ॐ

॥ श्रीहरिश्शरणम्मम ॥

# ॥ श्रीजीवोत्तमनुतिः ॥

(लघुविवरणसँवलिता)

नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि ।

प्रबन्धा—पण्डित आनन्दतीर्थाचार्यः

**With an Introduction**
**by**
**Dr. B. N. K. Sharma**

**Published by**
**SRI HAMSAVAHANA PRAKASHANAM**
**1073, Ananthashayana Galli, Belgaum-590 002**

**With the Liberal Patronage Afforded By**

**Dr. A. L. KULKARNI, M.D.**
**863, Bhandarkar Road, Poona-411 004**

ॐ

॥ श्रीहरिश्शरणम्मम ॥

# ॥ श्रीजीवोत्तमनुतिः ॥

(लघुविवरणसँवलिता)

नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि ।

प्रबन्धा—पण्डित आनन्दतीर्थाचार्यः

**With an Introduction**
**by**
**Dr. B. N. K. Sharma**

**Published by**

**SRI HAMSAVAHANA PRAKASHANAM**
**1073, Ananthashayana Galli, Belgaum–590 002**

**With the Liberal Patronage Afforded By**

**Dr. A. L. KULKARNI, M.D.**
**863, Bhandarkar Road, Poona–411 004**

SRI JIVOTTAMANUTI by Pandit Anandatirthacharya, Published by Sri Hamsavahana Prakashanam, 1073, Ananthashayana Galli, Belgaum-590 002, June 1994

**First Edition 2000 Copies**

**Price Rs. 5-00 (For Further Publication)**

सतां सकाशतो भिक्षाकणान् सङ्गृह्य भक्तितः ।
जीवोत्तमनुतिः पुण्या सात्विकेषु समर्प्यते ॥

## ಗ್ರಂಥ ಬಿಡುಗಡೆ

ಈ ಗ್ರಂಥವನ್ನು ಪರಮಪೂಜ್ಯ ಸ್ವವಾ. ವಾಳ್ವೇಕರ ವೆಂಕಣ್ಣಾಚಾರ್ಯರ ಸಾಕು ಮಕ್ಕಳೂ, ಶ್ರೀ ವೀಣಾಪಾಣೀ ಮಾರುತಿ ದೇವಸ್ಥಾನದ ಅರ್ಚಕರೂ ಆದ ಪೂಜ್ಯ ಪಂ. ರಾಮಾಚಾರ್ಯ ಜೋಶಿ ಇವರು ತಮ್ಮ ಅಮೃತ ಹಸ್ತದಿಂದ, ಬೆಂಗಳೂರಿನ ಸುಪ್ರಸಿದ್ಧ ಪ್ರವಚನಕಾರರಾದ ಪೂಜ್ಯ ಪಂ. ಬಾಳಿಗಾರು ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರ ಘನ ಅಧ್ಯಕ್ಷತೆಯಲ್ಲಿ ಹಾಗೂ ಗ್ರಂಥಕರ್ತರ ಉಪಸ್ಥಿತಿಯಲ್ಲಿ, ಪವಮಾನಸಹಿತ ಶ್ರೀ ಸ್ವಾಪ್ನ ವೃಂದಾವನಾಖ್ಯಾನ ಹೋಮದ ಪೂರ್ಣಾಹುತಿಯ ಶುಭ ಸನ್ನಿವೇಶದಲ್ಲಿ ಬೆಳಗಾಂವಿಯ ಶ್ರೀಮದನಂತಶಯನ ದೇವಸ್ಥಾನದಲ್ಲಿ, ಶ್ರೀ ಭಾವನಾಮ ಸಂವತ್ಸರ, ಜ್ಯೇಷ್ಠ ಕೃಷ್ಣ ಅಷ್ಟಮಿ, ದಿನಾಂಕ 1-7-1994 ರಂದು ಬಿಡುಗಡೆ ಮಾಡಿದರು.

*No rights reserved. This poem Srijivottamanuti, may be used, translated or reproduced in any manner without written permission from the Publisher by all Sattvika people.*

**Printed At :**

**PRABHA PRINTING HOUSE**

**22/A, Dr. D. V. G. Road, Basavanagudi, Bangalore-560 004**

## ॥ समर्पणम् ॥

**DEDICATED**
**to the memory of**
**Sri Narayana Rao Srinivasa Rao Kulkarni**
A Parama Bhāgavatha

और

हिन्दूधर्म, संस्कृति, दर्शनशास्त्रों एवं
त्रिभुवनाद्भुतसच्छास्त्रग्रन्थरत्न श्रीस्वाप्नवृन्दावनाख्यान
के अगाधविदुषी श्रीहरिगुरुभक्ता
अखण्डसौभाग्यवती
**श्रीमती विद्यादेवी अनन्त कुलकर्णीजी,** M.A., M.Phil.
(२-१-१९४२—१३-३-१९९४)
की पुण्यस्मृति में
उनकी अव्यक्त ''मातृस्नेहसुधा'' से सिञ्चित उस
सत्सङ्कल्पतरु का यह पावन मधुरफल
सादर समर्पित कर रहाँ हूँ ॥

**पण्डित आनन्दतीर्थाचार्यः**
**आत्मकूर**

**A Valuable Opinion Of**

**Dr. S. RADHAKRISHNAN**

"I am sure that Sri Anandathirtha Sharma's Work "**श्रीजीवोत्तमनुतिः**" is a very valuable addition to the Sanskrit literature and will be widely appreciated by scholars all over the country."

Madras
2-5-1969

(*Sd.*) **S. Radhakrishnan**

## INTRODUCTION

'Sri Jīvottamanuti' is a fine authoritative metrical composition covering over 132 sacred and esoteric names of Mukhya Prāṇa, the highest in the cadre of Jīvas according to the ancient Ārṣa tradition embodied in the philosophy of Śrī Madhvācārya and propagated by him.

The status of Mukhya Prāṇa as a deity (devatā) and a sentient principle occupying a distinctive place in the divine hierarchy has been completely ignored and lost sight of in the other Vedānta schools. The works of Śrī Madhvācārya have revived and restored to Mukhya Prāṇa the place of honour which is due to him in Vedic, Upaniṣadic, Sūtra and Purāṇic theology. The evidence from the Vedic, Upaniṣadic and Post-Upaniṣadic sources collected, recorded and handed down by Śrī Madhvacārya on this question is irrefragable. The parables in the Chāndogya, Bṛhadāraṇyaka, Aitareya and references in the Īśa Upaniṣads establish the incontestable and universally acknowledged primacy of Mukhya Prāṇa among the gods next only to the Supreme Brahman and the Śrītattva (Cit Prakṛti). He is reckoned as one of the Immaculate Trinity—Parasuklatraya. He is the first born son of God (Bṛh Up. Bhāṣya, i, 2, 1–7). He is the Puruṣo Mānavaḥ spoken of in the Upaniṣad who leads the enlightened souls and ushers them into the presence of the Lord—*Sa eñan brahma gamayati*. He is impervious to Āsuric influences (असुर-पाप्माविद्ध). He is the fittest Pratīka (base) for meditating on the Supreme Brahman. The Īśāvāsya text refers to Mukhya Prāṇa (Mātariśvan) as rendering a faithful account of the doings of creatures to Lord—Tasmin apo Mātariśvā dadhāti. The closing part of the same Upanisad gives the secret names of the Lord who is indwelling in Mukhya Prāṇa *(Asau)* as *Aham* and *Asmi*, the undiscardable (aheya) and the one who is always

aware of his eternal existence and eternal knowledge (as–mi) the two most esoteric epithets of God which have been passed on as "I am that I am" to Moses in the Old Testament and to Zarathushtra in the Avesta. The Chān. Up. hails him as the Jyeṣṭha and Śreṣṭha. The daily ritual of Prāṇāhuti offered by holy Brahmins during the daily meal attests the indispensable place of Prāṇa : The Ṛgveda speaks of him as uncovering the Lord hidden in the cave of the heart of man (Guhāsantam Matariśvā mathāyati). The Śiśu Brāhmaṇa of Bṛh. Up. gives a beautiful metaphorical account of Mukhya Prāṇa as a calf seated within the subtle body of Jīvas (Lingaśarīra) enclosed by an outer shed tethered to the Supreme (Prāṇaḥsthūṇā) with the cord of Anna (cit Prakṛti) presiding over Tejo-abanna, the primal triple elements. The Yantroddhāra Hanūmān installed in Hampi by Śrī Vyāsatīrtha is a unique iconographic representation of the metaphor of the Śiśu Brāhmaṇa.

There is no need to multiply evidences. The famous Śāntimantra recited at the beginning and conclusion of any Vedic recital by every Brahmin, be he a Smārta or a Vaiṣṇava or Śaiva, *Namaste Vāyo Tvam eva Pratyakṣam Brahma asi* —sets the seal of approval on the pre-emience of Vāyu (Mukhya Prāṇa) as the immediate base of worship and meditation of the Supreme Brahman. The adjective Pratyakṣam in Pratyakṣam Brahma is needless if Vāyu is straightaway to be declared identical with Brahman. The adjective therefore hints at the fact that Mukhya Prāṇa is the visible base (adhiṣṭhānam) for meditation on the Lord.

These various holy names of Mukhya Prāṇa which lie scattered all over the sacred literature and the commentaries of the great Ācārya who has for the first time brought them to light for the benefit of deserving souls, have now been selected,

collected and arranged in some order and woven into rhythmical verses in long and short metres in flowing Sanskrit for the benefit of devotees by the enterprising genius of my young friend Pandit Anandatirthacharya who now presides over the Pāṇini Mahāvidyālaya at Atmakur (Karnool Dist., A.P.) after the demise of his father Vaiyākaraṇa Kaṇṭhīrava Śrī Padmanābhācārya, the founder of the Pāṇini Mahāvidyālaya.

Shri Anandatirthacharya is himself an accomplished scholar in several other branches of Sanskrit learning besides Vyākaraṇa which is his *forte*. He is good at versification and a great and sincere devotee. He has a commendable knowledge of English too, besides being well up in Telugu and Kannada. He has given ample evidence of his literary skills thro' many Stotras, Poems, Champu prabhandhas and Commentaries. He has, in the present work of 162 verses, collected and arranged over 132 names and epithets of Mukhya Prāṇa selected from the original Vedic, Upaniṣadic and Purāṇic texts and from the writings of Śri Madhvācārya. As these names have an esoteric basis and background and as their full significance has to be understood while reciting them according to one's capacity, the author has brought to bear on their etymological and exegetical niceties with his rich expertise in Nirukti, grammar and a host of collateral texts. The epithets of the Mūlarūpa of Mukhya Prāṇa and his Avatāras as Hanūmān, Bhīma and Madhva are explained with relevant details.

It is not possible to do justice to the versatality of the author in making available to the Mādhva world this splendid 'Nuti' of Jīvottama Mukhyaprāṇa. Suffice it to say that it is an index of his depth of devotion to and faith in Śrī Hari, Vāyu and the Gurus. May all the devotees make an indepth study of this remarkable work of my friend Anandatīrtha and

earn the grace of the Mukhyaprāṇa which is indispensable for getting the grace of the Lord.

Cf. विशेषेणैतत् भाव्यम् । तत्प्रसादायत्तत्वात् जिज्ञासाया इत्याशयेनोक्तम्—"तत्प्रसादानुरञ्जितः" इति ।

I consider it a privilage to associate my name with the publication of this remarkable work.

**Dr. B. N. K. SHARMA,**
M.A., Ph.D., D.Litt.
Rtd. Professor of Sanskrit
Ruparel College, Bombay-16
*(Recipient of Central Sahitya Akademi, President of India and Govt. of Maharashtra Awards)*

4/2, Shah Building,
Bhagat Road, Bombay-400 016
20-11-1993

|| ಶ್ರೀಃ ||

# ಪ್ರಕಾಶಕರ ಬಿನ್ನಹ

ಜಯತಿ ಶ್ರೀ ರಮಾನಾಥಃ ಜಯತಿ ಶ್ರೀಶ್ಚ ತತ್ಪ್ರಿಯಾ |
ಶ್ರೀ ಶ್ರೀಶಭಕ್ತೋ ಜಯತಿ ಮಧ್ವೋ ವಿಧ್ವಸ್ತಸಾಧ್ವಸಃ ||

ಪರಮಪೂಜ್ಯ ವೈಷ್ಣವ ಬಾಂಧವರೇ,

ಉತ್ಪತ್ತಿ ಹೊಂದಿದ ಎಲ್ಲರಿಗೂ ದುಃಖಲೇಶವಿಲ್ಲದ ಸ್ವಸ್ವರೂಪಾನಂದಾವಿರ್ಭಾವ ರೂಪ ಮುಕ್ತಿಯಾಗಬೇಕೆಂದು ಅಪೇಕ್ಷೆ ಇದ್ದೇ ಇರುತ್ತದೆ. ಅಂತಹ ಸುಖರೂಪ ಮುಕ್ತಿಯು, ಭಗವಂತನೇ ಸರ್ವತಂತ್ರಸ್ವತಂತ್ರನು, ಇತರರೆಲ್ಲರೂ ಅಸ್ವತಂತ್ರರು, ಶ್ರೀಶನೇ ನಿಯಾಮಕನು, ಎಲ್ಲರೂ ಆತನ ಅಧೀನರು, ನೀಚೋಚ್ಚಭಾವ ಜ್ಞಾನ, ಜಗತ್ಸತ್ಯತ್ವ, ಪಂಚಭೇಧ ಜ್ಞಾನ ಇತ್ಯಾದಿ ಜ್ಞಾನಗಳಿಂದಲೇ ಲಭಿಸಬೇಕು. "ಜೀವಗತಕರ್ತೃತ್ವವು ಭಗವದಧೀನ ಕರ್ತೃತ್ವವೇ" ಎಂದು ಸಾತ್ವಿಕರು ತಿಳಿಯಲೇಬೇಕು. ಯಾಕಂದರೆ— "ಇದಂ ಮಯಾ ಕ್ರಿಯತೇ | ಇದಂ ಮಯಾ ನ ಕ್ರಿಯತೇ | ಇದಂ ಮಯಾ ವಿಪರೀತಂ ಕ್ರಿಯತ ಇತಿ ಬುದ್ಧಿಭೇದಃ ರಜಸ್ತಮೋಗುಣನಿಮಿತ್ತೋ ಭ್ರಮಃ | ಸರ್ವಂ ಹಿ ಪರಮೇಶ್ವರಃ ಕರೋತಿ |" ಎಂದು ಸರ್ವಜ್ಞಾಚಾರ್ಯರು ಶ್ರೀಮದ್ಭಾಗವತ ತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ (೧೧–೭–೮) ಎಚ್ಚರಿಸಿ ಅನುಗ್ರಹಿಸಿದ್ದಾರೆ. ಮತ್ತು ಶ್ರೀಮಟ್ಟೀಕಾ ಕೃತ್ಪಾದರು—"ಕರ್ತಾऽಪ್ಯಹಮೇವ ಕರ್ತೇತಿ ಸಾತ್ವಿಕೋ ನ ವದತಿ| ತೇನ ಸ್ವಕರ್ತೃತ್ವಾದೇಃ ಸರ್ವಸ್ಯ ಭಗವದಧೀನತಯಾ ನಿಶ್ಚಿತತ್ವಾದಿತ್ಯರ್ಥಃ |" ಎಂದು ಗೀತಾತಾತ್ಪರ್ಯ ನಿರ್ಣಯ ನ್ಯಾಯದೀಪಿಕಾ ಗ್ರಂಥದಲ್ಲಿ (೧೮–೨೬–೨೭) ಅಪ್ಪಣೆ ಕೊಟ್ಟಿದ್ದಾರೆ. ಏತಾವತಾ ಸಾತ್ವಿಕರ ಸಾಧನಗಳಲ್ಲಿ ಜೀವಗತ ಕರ್ತೃತ್ವವೆಂಬೋದು ಹರ್ಯಧೀನ ಕರ್ತೃತ್ವವೆಂದೇ ತಿಳಿಯಬೇಕು. ಇದೇ ನಿಷ್ಕಂಟಕ ಮೋಕ್ಷ ಮಾರ್ಗ. ಆದರೆ, "ಏಷ ಉ ವಾ ಶುಭಾಶುಭೈಃ ಕರ್ಮಫಲೈರೇನಂ ಸಂಯೋಜಯತಿ ನ ಸ್ವಯಂ ಸಂಯುಕ್ತೋ ಭವತಿ" ಎಂಬೋ ಪೈಂಗೀ ಶ್ರುತಿಯ ವಚನ (ಗೀತಾತಾತ್ಪರ್ಯ ನಿರ್ಣಯಃ, ೩–೪೩) ದಿಂದ ಕರ್ಮದ ಫಲಮಾತ್ರ ಜೀವನಿಗೆ ಬರುತ್ತದೆ. ಇದು ಶಾಸ್ತ್ರ ಸಿದ್ಧ, ಇದೇ ವಾಯು ಮತ. ಶ್ರೀ ವಿಷ್ಣುವೇ ಮೋಕ್ಷವನ್ನು ಕೊಡುವವನು. ಶ್ರೀಹರಿಯ ಆಜ್ಞೆಯಿಂದ ವಾಯುದೇವರು ಮೋಕ್ಷವನ್ನು ಕೊಡುವರು. ವಾಯುದೇವರು ಮುಕ್ತರನ್ನು ಇಂದ್ರ ನಾಮಕ ಶ್ರೀಹರಿಯ ಸಮೀಪಕ್ಕೆ ಒಯ್ಯುತ್ತಾರೆ. "ಯತ್ರ ಬ್ರಹ್ಮ" ಇತ್ಯಾದಿ ಆರು ಋಕ್ಕುಗಳಿಂದ "ಭೋ, ಮುಖ್ಯಪ್ರಾಣಸ್ವಾಮೀ, ನಮ್ಮನ್ನು ಸಂಸಾರದಿಂದ ಬಿಡುಗಡೆ ಮಾಡಿ ವೈಕುಂಠ ಲೋಕಕ್ಕೆ ಒಯ್ಯು" ಎಂದು ಮುಖ್ಯ-ವಾಯುದೇವರನ್ನು ಪ್ರಾರ್ಥಿಸಬೇಕು. ಇಷ್ಟೇ ಅಲ್ಲದೆ ಮುಖ್ಯಪ್ರಾಣನಿಗೆ ಶಾಸ್ತ್ರದ ವಿವಕ್ಷಾಭೇದದಿಂದ ಸಂಕೋಚೇನ

ಯೋಗವೃತ್ತಿಯಿಂದ ನಾರಾಯಣಶಬ್ದವಾಚ್ಯತ್ವವು ಉಂಟು. ಯಾಕೆಂದರೆ—"ನಾರಾಃ = ಮುಕ್ತಾಃ, ತೇಷಾಮ್ ಅಯನಮ್ = ಆಶ್ರಯಃ, ನಾರಾಯಣಃ = ಶ್ರೀವಾಯುಃ" ಎಂದು ತಾಮ್ರಪರ್ಣೀ ಆಚಾರ್ಯರು ಅಪ್ಪಣೆ ಕೊಟ್ಟಿದ್ದಾರೆ. ಅವರೇ "ನಾರಾಯಣಾದಿ ಶಬ್ದಾಭಿಮಾನಿತ್ವೇನಾಭಿಮಾನ್ಯಭಿಮನ್ಯಮಾನಯೋರೇಕನಾಮತ್ವನಿಶ್ಚಯಾದೇತದ್ವಿವಕ್ಷಯಾ ನಾರಾಯಣಾದಿಶಬ್ದವಾಚ್ಯತಾ" ಎಂದು ಬ್ರಹ್ಮವಾಯುಪ್ರಕರಣದಲ್ಲಿಯ ಸತ್ತತ್ವರತ್ನಮಾಲಾ ಪ್ರಕಾಶಿಕಾ (ಶ್ಲೋಕ ೧೭೨)ದಲ್ಲಿ ಸ್ಪಷ್ಟೀಕರಿಸಿದ್ದಾರೆ. ಸಮಸ್ತ ರುದ್ರಾದಿಗಳಿಗೆ ಜೀವೋತ್ತಮರಾದ ವಾಯುದೇವರು ಶ್ವಾಸರೂಪದಿಂದ ಪವಿತ್ರೀಕರಿಸುತ್ತಾರೆ. ನಿರವಧಿಕ ಸುಖಪೂರ್ಣನಾದ ಶ್ರೀಮನ್ನಾರಾಯಣನೇ ರಕ್ಷಕನಾಗಿ ಉಳ್ಳವನು. ಸಜ್ಜನರಿಗೆ ಪ್ರಿಯನು. ದುಃಶಾಸ್ತ್ರಗಳನ್ನು ತಿರಸ್ಕರಿಸಿ ಸಚ್ಛಾಸ್ತ್ರಗಳನ್ನು ಪ್ರಕಟಿಸಿದ ಇಂತಹ ಪವಿತ್ರರಥರೂ ಜೀವಘನರಾದ ಶ್ರೀ ಮಧ್ವರು ಪಂಚಬೇಧಗಳನ್ನು ಸ್ಥಾಪನೆ ಮಾಡುತ್ತಾ, ಸಜ್ಜನರನ್ನು ಸಂತೋಷಗೊಳಿಸುತ್ತಾರೆ. "ತತ್ಪುರುಷೋ ಮಾನವಃ" ಇತ್ಯಾದಿ ಶ್ರುತಿಗಳಿಂದ "ಎಲ್ಲಾ ಲೋಕಗಳಿಗಿಂತಲೂ ಮೇಲಿನದಾದ ಸತ್ಯಲೋಕಕ್ಕೆ ಅಧಿಪತಿಯಾದ, ಜೀವೋತ್ತಮರಾದ ಭಾವಿಬ್ರಹ್ಮರಾದ ಮುಖ್ಯ ವಾಯುದೇವರು ಈ ಮುಕ್ತರನ್ನು ಪರಬ್ರಹ್ಮನ ಸಮೀಪಕ್ಕೆ ಕಳಿಸುತ್ತಾರೆ" ಎಂಬುದು ಸ್ಪಷ್ಟವಾಯಿತು. "ಪ್ರಾವೀವಿಪದ್ ವಾಚ ಊರ್ಮಿಮ್" ಇತ್ಯಾದಿ ಶ್ರುತಿಗಳು "ಸಕಲ ಸದ್ವಿದ್ಯೆಗಳಿಗೆ ಉಪದೇಶಕರಾದುದರಿಂದ ಅನಂತವೇದವಾಕ್ಯಗಳಿಗೆ ಆಧಾರಭೂತರೂ, ವೇದ ಬ್ರಹ್ಮಸೂತ್ರ ಮೊದಲಾದ ಸಚ್ಛಾಸ್ತ್ರಗಳನ್ನು ಸಜ್ಜನರಿಗೆ ಉಪದೇಶಿಸುವವರೂ, ಪುರಾಣ ಶಾಸ್ತ್ರಾದಿಗಳಿಗೆ ಪೂರ್ವೋತ್ತರ ವಿರೋಧ ಬಾರದಂತೆ ಅರ್ಥವನ್ನು ಉಪದೇಶಿಸುವವರೂ, ಸರ್ವದಾ ತನ್ನ ಹೃದಯಕಮಲದಲ್ಲಿ ಪರಮಾತ್ಮನನ್ನು ನೋಡುತ್ತಿರುವವರೂ ಆದ ಸಮಸ್ತ ಅಧಿಕಾರಿ ವರ್ಗಗಳಲ್ಲಿ ಶ್ರೇಷ್ಠರಾದ ಶ್ರೀ ಮಧ್ವರೂಪೀ ವಾಯುದೇವರು ಸಕಲ ಸಜ್ಜನರಿಗೂ ಶುಭ ಪ್ರೇರಕರಾಗಿರುತ್ತಾರೆ" ಎಂದು ಘೋಷಿಸುತ್ತವೆ. ವಾಯುದೇವರು ಗರುಡ, ಶೇಷ, ರುದ್ರ, ಇಂದ್ರ ಮೊದಲಾದ ಜೀವರಕ್ಕಿಂತ ಉತ್ತಮರೆಂದು ಶ್ರುತಿಗಳು ನಿರೂಪಣೆ ಮಾಡುತ್ತವೆ. ಅಷ್ಟುಮಾತ್ರ ಅಲ್ಲದೆ, ಸುಮಧ್ವ ವಿಜಯ, ಅಣುಮಧ್ವವಿಜಯ, ಶ್ರೀವಾಯುಸ್ತುತಿ, ಯಜುಸ್ಸಂಹಿತಾ, ಬಳಿತ್ಥಾಸೂಕ್ತ, ಪವಮಾನ ಸಂಹಿತಾ, ಪದ್ಮಪುರಾಣ, ಗಾರುಡ ಬ್ರಹ್ಮಕಾಂಡ, ವಾಯುಪುರಾಣ, ಸರಸ ಭಾರತೀ ವಿಲಾಸ, ಯುಕ್ತಿಮಲ್ಲಿಕಾ, ಋಗ್ವೇದದ ಆರನೇ ಅಷ್ಟಕದ ಅಂತಿಮ ಎರಡನೇ ಅಧ್ಯಾಯ, ಏಳನೇ ಅಷ್ಟಕದ ಏಳನೇ ಅಧ್ಯಾಯ, ಒಟ್ಟು ಸಾಧಾರಣ ಏಳು ಅಧ್ಯಾಯಗಳು ಇವೇ ಮೊದಲಾದ ಅನೇಕಾನೇಕ ಪ್ರಮಾಣಗಳು ಮುಖ್ಯಪ್ರಾಣರ ಜೀವೋತ್ತಮತ್ವಾದಿ ಮಹಿಮಾ ಪ್ರತಿಪಾದಕಗಳಾಗಿವೆ. ಹೆಚ್ಚೇನು, "ಭೂಭಾರಹಾರಿಣೋ ವಿಷ್ಣೋಃ ಪ್ರಧಾನಾಂಗಂ ಹಿ ಮಾರುತಿಃ, ರಾಮ ಕೃಷ್ಣಾತ್ಮನೋ ಹರೇಃ ಅಂತರಂಗಂ ಹನೂಮಾಂಶ್ಚ ಭೀಮಸ್ತತ್ಕಾರ್ಯ ಸಾಧಕೌ" ಇತ್ಯಾದಿ ಪ್ರಮಾಣಗಳು ಹನುಮಂತಭೀಮಸೇನರು ರಾಮಕೃಷ್ಣರೂಪಿ ಪರಮಾತ್ಮನಿಗೆ ಪ್ರಧಾನಾಂಗಭೂತರು, ಭಗವತ್ಕಾರ್ಯಸಾಧಕರಲ್ಲಿ

ಅಗ್ರೇಸರರು. ಹೀಗೆಯೇ ಭಗವಂತನ ಪ್ರೀತಿಗೆ ಮುಖ್ಯಪಾತ್ರರಾದ ವಾಯುದೇವರ ಅಧೀನದಲ್ಲಿಯೇ ಎಲ್ಲಾ ದೇವತೆಗಳು ಇರುತ್ತಾರೆಂದು ಸಾರುತ್ತವೆ. ಅಲ್ಲದೆ ಹನುಮಂತನು ಶಿಶುವಾಗಿದ್ದಾಗಲೇ ದೇವೇಂದ್ರನು ಶಿರಸ್ಸಿಗೆ ವಜ್ರಪ್ರಹಾರ ಮಾಡಿದಾಗ ಕುಪಿತರಾದ ವಾಯುದೇವರು ರುದ್ರ, ಇಂದ್ರ ಮೊದಲಾದ ದೇವತೆಗಳ ಶ್ವಾಸನಿರೋಧ ಮಾಡಿ ನಿಶ್ಚೇಷ್ಟಿತರನ್ನಾಗಿ ಮಾಡಿದರೆಂದು ರಾಮಾಯಣದಲ್ಲಿ ಉಕ್ತವಾಗಿದೆ. ಭಗವಂತನ ಕಾರ್ಯಸಾಧನೆಯಲ್ಲಿ ಧುರಂಧರರಾದ ಗರುಡ, ಶೇಷ, ರುದ್ರೇಂದ್ರಾದಿಗಳಿಕಿಂತಲೂ ಉತ್ತಮರಾದ ವಾಯುದೇವರ ಮಹಿಮೆಯು, ಋಗಾದಿ ಸರ್ವಶಾಸ್ತ್ರಗಳಲ್ಲಿಯೂ ಸಮಸ್ತ ಪುರಾಣಗಳಲ್ಲಿಯೂ ನಿರೂಪಿತವಾಗಿದೆ. ಈ ಪವಮಾನ ಮಹಿಮಾ ಸಪತ್ನೀಕರಾದ ಸುಪರ್ಣ, ಶೇಷ, ರುದ್ರಾದಿ ದೇವತೆಗಳಿಗೆ ವರ್ಣಿಸಲು ಸಾಧ್ಯವಿಲ್ಲ. ಇನ್ನು ಅಸ್ಮದಾದಿಗಳು ಯಾವ ಗಿಡದ ತೊಪ್ಪಲು !

ಆದರೂ ನಮ್ಮ ಪೂಜ್ಯ ಗುರುಗಳಾದ ಪಂಡಿತರಾಜ ಆನಂದತೀರ್ಥಾಚಾರ್ಯರು (ಆತ್ಮಕೂರು-೫೧೮೪೨೨) ಅತ್ಯಂತ ಭಕ್ತಿಯಿಂದ "ಶ್ರೀಜೀವೋತ್ತಮನುತಿಃ" ಎಂಬೋ ಭಕ್ತಿರಸಪೂರ್ಣವಾದ ಕೃತಿಯನ್ನು ರಚಿಸಿ, ಸ್ತುತಿಸಿ ಧನ್ಯರಾಗಿದ್ದಾರೆ ! ಇಂಥಾ ಉತ್ತಮವಾದಂಥಾ ಕೃತಿಯನ್ನು "ಶ್ರೀ ಹಂಸವಾಹನ ಪ್ರಕಾಶನ"ದಿಂದ ಪ್ರಕಾಶಿಸಲು ಸುಯೋಗವನ್ನು ಕಲ್ಪಿಸಿದ್ದಕ್ಕೆ ನಾವು ಹರ್ಷೋತ್ಫುಲ್ಲ ಮಾನಸರಾಗಿದ್ದೇವೆ.

ಪ್ರಸಕ್ತಾನುಪ್ರಸಕ್ತ್ಯಾ ಈ "ಶ್ರೀ ಜೀವೋತ್ತಮನುತಿಃ" ಎಂಬೋ ಕೃತಿಯಲ್ಲಿ ಮತ್ತು ಅದರ "ಲಘುವಿವರಣಮ್"ದಲ್ಲಿ ಶ್ರೀ ಸ್ವಾಪ್ನವೃಂದಾವನಾಖ್ಯಾನದ ಪ್ರಾಮಾಣ್ಯದ ಬಗ್ಗೆ ಐತರೇಯ-ಬ್ರಾಹ್ಮಣ (೭-೩-೧೮) "ತಸ್ಮಾದ್ ಯೋ ರಾಜಾ ವಿಜಾತೀಸ್ಯಾದ್ ಅಪ್ಯ ಯಜಮಾನ ಆಖ್ಯಾಪಯೇತೈವೈತಚ್ಛೌನಃಶೇಪಮಾಖ್ಯಾನಂ ನಹಾಸ್ಮಿನ್ನಲ್ಪಂಚ ನೈನಃ ಪರಿಶಿಷ್ಯತೇ" (ಐತರೇಯ ಬ್ರಾಹ್ಮಣಪಂಚಿಕಾ ೧೨೧ ನಿರಂಕ (೭-೩-೧೮) ನಿರ್ಣಯಸಾಗರ ಮುದ್ರಣಾಲಯ, ಸನ್.-೧೯೧೦) ಎಂಬೋ ವಾಕ್ಯಕ್ಕೆ ಅತ್ಯಂತ ಪ್ರಾಮಾಣಿಕ ತರ್ಕಬದ್ಧವಾದ ವ್ಯಾಖ್ಯಾನವನ್ನು ಮಾಡಿ ಸ್ವಾಪ್ನವೃಂದಾವನಾಖ್ಯಾನದ ಪ್ರಾಮಾಣ್ಯವನ್ನು ನಿಪುಣತರವಾಗಿ ನಿರೂಪಣೆ ಮಾಡಿದ್ದಾರೆ. ಇದನ್ನು ಪಂಡಿತರು ನೋಡಲೇ ಬೇಕು. ಇದೂ ಅಲ್ಲದೆ ಶ್ರೀ ಸ್ವಾಪ್ನವೃಂದಾವನಾಖ್ಯಾನೋಕ್ತ ಋಜುತ್ವ ಪ್ರತಿಪಾದಕ ಶ್ರುತಿಗಳಾದ "ಬಧ್ವೀ ಸಮಾಃ, ಸಂಜರ್ಭುರಾಣಃ, ಜಾಮಿಃ ಸಿಂಧೂನಾಮ್, ಶ್ವಸಿತ್ಯಪ್ಸು, (ನಿತ್ಯಂ ಬ್ರಾಹ್ಮಣಸಂಬಂಧಿ) ಅಪ್ಸು ರಾಜಾ ವಿಭಾತಿ, ಲಾತವ್ಯೋ ಗೋತ್ರಃ" ಇತ್ಯಾದಿ ಶ್ರುತಿ ವಚನಗಳಿಗೆ ಪರಮ ಪ್ರಾಮಾಣಿಕ ವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಸಚ್ಛಾಸ್ತ್ರಾನುಕೂಲವಾಗಿ ವ್ಯಾಖ್ಯಾನಿಸಿ ಲಾತವ್ಯರಾದ ಶ್ರೀವಾದಿರಾಜರು ಶ್ವಾಸನಿಯಾಮಕರು ಮತ್ತು ಋಜುಗಳು ಎಂದು ಸಿದ್ಧಾಂತ ಮಾಡಿ ನಿರೂಪಿಸಿದ್ದಾರೆ. ವಿಪಶ್ಚಿತರಿಗೆ ಇದನ್ನು ನೋಡಿದರೆ ಪರಮಾನಂದವಾಗುತ್ತದೆ. "ಶ್ರೀಜೀವೋತ್ತಮನುತಿಃ" ಮತ್ತು ಅದರ "ಲಘು

ವಿವರಣವನ್" ಬಹು ಸಮಾಖ್ಯಾಶ್ರುತಿಗಳಿಂದ ಯುಕ್ತವಾದ, "ಮಾಧ್ವಸಂಪ್ರದಾಯ ವೇದಾರ್ಥ ಪ್ರಕ್ರಿಯಾನುಸಾರ" ವಾಯು ಮಹಿಮಾ ಪ್ರತಿಪಾದಕವಾದ ಒಂದು ಅತ್ಯಂತ ಮಹತ್ವಯುಕ್ತ ನಿರುಕ್ತಶಾಸ್ತ್ರಗ್ರಂಥಸಂಗ್ರಹವೇ ಆಗಿಬಿಟ್ಟಿದೆ. ಶ್ರೀ ವಾದಿರಾಜರ ಋಜುತ್ವವು ಸಿದ್ಧಕೋಟಿಯಲ್ಲೇ ಇದೆ, ಸಾಧ್ಯಕೋಟಿಯಲ್ಲಿ ಇಲ್ಲವೇ ಇಲ್ಲಾ ಎಂದು "ಲಘು ವಿವರಣವನ್"ದಲ್ಲಿ ಪ್ರಸಂಗವಶಾತ್ ದೃಢತರವಾಗಿ ಸಿದ್ಧಾಂತ ಮಾಡಿದ್ದಾರೆ ಆನಂದತೀರ್ಥಾಚಾರ್ಯರು. ಶೀಘ್ರದಲ್ಲಿಯೇ ಈ ನುತಿಯು ವಿಸ್ತೃತ ಕನ್ನಡಾನುವಾದದಿಂದಲೂ ಪ್ರಕಾಶಗೊಳ್ಳಲಿದೆ.

ಇಂಥಾ ಅತ್ಯುತ್ತಮವಾದ ಕೃತಿಗೆ ಭೂಮಂಡಲವಿಖ್ಯಾತ ದಾರ್ಶನಿಕ ಚಕ್ರವರ್ತಿಗಳೂ, ಜ್ಞಾನವಯೋವೃದ್ಧರೂ, ಆರ್ಯಗುಣಸಂಪನ್ನರೂ ಮತ್ತು ಶ್ರೀ ಮನ್ಮಧ್ವಸಿದ್ಧಾಂತವಿಯದ್ವಿಷ್ಣುಪದೀಧರರಾದ ಡಾ|| ಬಿ. ಎನ್. ಕೆ. ಶರ್ಮಾ, 111/272, ರಾಜಾ ಸ್ಟ್ರೀಟ್, ಕೊಯಮತ್ತೂರು ಅವರು ಆಂಗ್ಲದಲ್ಲಿ ಮಹಾರ್ಘವಾದ ಮುನ್ನುಡಿಯನ್ನು (Introduction) ಬರೆದುಕೊಟ್ಟು ಶ್ರೀ ಮುಖ್ಯಪ್ರಾಣದೇವರ ಸಂಪೂರ್ಣಾನುಗ್ರಹಕ್ಕೆ ಪಾತ್ರರಾಗಿ ಧನ್ಯರಾಗಿದ್ದಾರೆ.

ಸರ್ವೋತ್ತಮೋ ವಿಷ್ಣುರಥೋ ರಮಾ ಚ
ಬ್ರಹ್ಮಾ ಚ ವಾಯುಶ್ಚ ತದೀಯಪತ್ನ್ಯೌ |
ಅನ್ಯೇ ಚ ದೇವಾಃ ಸತತಂ ಪ್ರಸನ್ನಾ
ಹರೌ ಸುಭಕ್ತಿಂ ಮಯಿ ಸಂದಿಶಂತು ||

ಇತಿ,
ವೈಷ್ಣವರ ದಾಸಾನುದಾಸ
**ಎನ್. ವ್ಹಿ. ಕುಲಕರ್ಣಿ**
ಶ್ರೀ ಹಂಸವಾಹನ ಪ್ರಕಾಶನ,
1073, ಅನಂತಶಯನ ಬೀದಿ,
ಬೆಳಗಾಂವಿ–590 002

ಬೆಂಗಳೂರು
22–6–1994
ಶ್ರೀಪಾದರಾಜರ ಪು. ತಿ.

॥ श्रीः ॥

॥ श्रीहरिश्शरणम्मम ॥

# ॥ श्रीजीवोत्तमनुतिः ॥

## (लघुविवरणसँवलिता)

श्रीलक्ष्मीरमणो विभुः श्रुतिनुतः सर्वोत्तमो यो महान्
पूर्णागण्यगुणार्णवः स सविता सृष्टिं व्यधाल्लीलया ।
तस्योत्सङ्गनिषण्ण ! वायुभगवन् ! बद्धाञ्जलिस्तं हरिं
ध्यायन् भासि गदायुधाभयकर ! प्राणेश ! मन्यो ! गुरो ! ॥ १ ॥

श्रीविष्णुः कमठाकृतिः स्फुटमहो ! अण्डं बिभर्ति स्वयं
तत्पुच्छं त्वमुपाश्रितो विजयसे ह्यण्डोदके संस्थितः ।
श्रित्वा त्वां किल वायुकूर्म ! पृथिवीं शेषो वहन् भ्राजते,
बोधान ! प्रभुमध्व ! भीम ! हनुमन् ! जीवोत्तम ! त्वां भजे ॥ २ ॥
(युग्मम्)

उद्गीथाख्यहरेर्विशिष्टप्रतिमा गोवत्स उत्सो महान्
पूर्णानन्दतरो हरेः प्रियशिशुः श्रीमातरिश्वा स्वराट् ।
ज्येष्ठोऽनन्तगुणाकरोऽसि पवन ! त्वं लोकचेष्टाप्रदः,
भो ! सूत्राख्य ! नमो नमो मम गुरो ! श्रीमूलवायो ! मनो ! ॥ ३ ॥

सर्वप्राणगणाधिप ! श्रितहरे ! श्रीभारतीश ! प्रधीः !
वाच्यस्त्वं बृहतीसहस्रमनुभिः सामाभिधानो यजुः ।
दीनं दूनमनाथमन्वहमहो ! त्रायस्व मां भो ! ऋजो !
बोधान ! प्रभुमध्व ! भीम ! हनुमन् ! जीवोत्तम ! त्वां भजे ॥ ४ ॥
(युग्मम्)

श्रीरामाङ्घ्रिजलेजसेवकतया जातोऽसि भो ! श्रीगुरो !
तीर्त्वा वारिनिधिं निहत्य दितिजान् दग्ध्वा च लङ्कापुरीम् ।
जानक्यै त्वमदाः प्रणम्य भगवन् ! श्रीरामदत्तोर्मिकां
वेदानुक्तगुणोऽमृतोऽस्ति स भवान् ओङ्कारवाच्यो विराट् ॥ ५ ॥

श्रीरामो रमया युतः खलु यदा पट्टाभिषिक्तस्तदा
तुभ्यं सा धरणीसुताऽजपदवीं सन्मौक्तमालां ददौ ।
मुख्यप्राण ! कृपानिधे ! कुरु कृपाम् आर्ते मयि प्रीयतां,
बोधान ! प्रभुमध्व ! भीम ! हनुमन् ! जीवोत्तम ! त्वां भजे ॥ ६ ॥

(युग्मम्)

गङ्गीयन्ति सदा समस्तसरितो, रौप्याचलन्त्यद्रयो,
नीलाब्जानि सिताम्बुजन्ति, गजता जम्भारिकुम्भीयति ।
चन्द्रत्यम्बुजबान्धवः, पिककुलं लीलामरालायते,
कर्पूरन्ति च कज्जलानि हनुमन् ! त्वत्कीर्तिसङ्कट्टतः ॥ ७ ॥

त्वं मातापितरौ त्वमेव शरणं त्वं सर्वभोक्ताऽसि दूः,
द्वात्रिंशद्वरचिह्नसंयुतवपुः शुक्लो द्युभर्त्ता मरुत् ।
स्वामिन् ! त्वत्पदपङ्कयोर्नियमले भृङ्गायतां मे मनः,
बोधान ! प्रभुमध्व ! भीम ! हनुमन् ! जीवोत्तम ! त्वां भजे ॥ ८ ॥

(युग्मम्)

श्रीभीम ! त्वमवातरः प्रतिदिशं भूमौ कलिं दूरयन्,
श्रीकृष्णं समभिष्टुवन्, द्रुपदजां सम्मोदयन् सर्वदा ।
किर्मीरं विनिबर्हयन्, प्रमथनं कुर्वंश्च दुर्योधनं,
हुङ्कारेण निषेधयन् युधि महानारायणास्त्रं गुरो ! ॥ ९ ॥

म्लेच्छान् श्रीहरिविद्विषो गजगणान् भिन्दंस्तथा मागधं,
वाह्लीकश्च समुद्धरन् गुणनिधे! सर्वज्ञ! भो! मध्यम!।
शीर्त्वा तं मणिमन्तमाशु दितिजं, कृष्णेष्ट! वायो! जय,
बोधान! प्रभुमध्व! भीम! हनुमन्! जीवोत्तम! त्वां भजे॥ १०॥

(युग्मम्)

सूर्याचन्द्रमसौ निरस्ततमसौ यावच्चिरं राजतो,
यावद्देवतरङ्गिणी सयमुना भुव्यस्ति भव्यस्थितिः।
यावद्वारिधयः प्रभूतनिधयः सन्त्यत्र सक्ष्माभृतः,
तावत्प्राज्ञवरा मुकुन्दहृदया जानन्तु भो! त्वामृजुम्॥ ११॥

वन्दारुश्रितभक्तकल्पपदपः पृक्षो हि विद्युत्पतिः,
वैराग्याङ्कुरवर्द्धने जलधरः सौभाग्यभाग्यो महः।
दौर्भाग्यं मम लोलवीतु भृतमो भीमः समुद्रो भवान्,
बोधान! प्रभुमध्व! भीम! हनुमन्! जीवोत्तम! त्वां भजे॥ १२॥

(युग्मम्)

श्रीमान् धर्मविलोपहेतुहतकम्लेच्छेभपञ्चाननो,
मध्वो ज्ञानविरागवान् इह भवान् बुध्नोऽस्ति लोकम्पृणः।
गोपीचन्दनपुण्ड्रभूषिततनुश्चक्रादिमुद्राङ्कितः,
*स्वङ्गारागरुगन्धपुष्पतुलसीनिर्माल्यधारिन्! यतिन्!॥ १३॥

कृष्णं निर्मलभक्तिसम्भृतहृदा ध्यायन् प्रतिष्ठापयन्,
मुद्रातीर्थनिवेदितान्नमतुलं शिष्येषु विश्राणयन्॥
संसारोद्भवतापमप्रतिहतं लोपं नय श्रीगुरो!
बोधान! प्रभुमध्व! भीम! हनुमन्! जीवोत्तम! त्वां भजे॥ १४॥

(युग्मम्)

---

*"स्वङ्गाराक्षतगन्धपुष्पतुलसीनिर्माल्यधारिन्! यतिन्!" इति पाठान्तरम्।

तत्त्वज्ञाननिधे ! यमीन्द्र ! पुरुधीः ! श्रीमध्व ! भूमन् ! गुरो !
दुर्दान्तप्रतिवादिवाददलन ! श्रीशापरोक्षप्रद ! ।
श्रीमद्व्यासगुरूपदिष्टमखिलं सद्युक्तिभिः ख्यापयन्,
श्रेष्ठो जीवनियामकोऽसि वरुण ! श्रीशाज्ञया मोक्षद ! ॥ १५ ॥

नाभीदेषु जनिङ्गतोऽसि कृतवान् सच्छास्त्रकल्पद्रुमं,
"गन्ताऽहं परमेष्ठिदिव्यपदवीं नूनं हरेराज्ञया ।"
इत्थं त्वं दृढनिश्चयोऽधिबदरि द्वैपायनं सेवसे,
बोधान ! प्रभुमध्व ! भीम ! हनुमन् ! जीवोत्तम ! त्वां भजे ॥ १६ ॥
(युग्मम्)

पूर्णप्रज्ञो मातरिश्वा गुहासन्तं मथायति ।
दशप्रमतिनामा यः स श्रीमध्वः पुनातु माम् ॥ १७ ॥

अभ्रमं भङ्गरहितम् अजडं विमलं सदा ।
आनन्दतीर्थमतुलं भजे तापत्रयापहम् ॥ १८ ॥

अग्र्यो मध्वो मध्वमुनिः स्फुटं बदरिकाश्रमम् ।
अग्रीभूत्वा व्रजन् सोऽसौ पातु मां वज्रसायकः ॥ १९ ॥

मतीनां जनिता विष्णोर्जनिता यः श्रुतौ श्रुतः ।
विप्राणाम् ऋषिरित्युक्तः स मध्वः पातु मां भवान् ॥ २० ॥

यस्यर्चो मध्वनामाङ्काः श्लोकानेकादशागृणन् ।
श्रीमध्वो वैदिकाचार्यो लोककृत्नुः स पातु माम् ॥ २१ ॥

सिंहं नसन्तश्रुत्या श्रीमध्वः शूरो महीतले ।
संत्सु बोधोक्षणं कुर्वन् श्रोतृषु प्रथमोऽवतात् ॥ २२ ॥

स्वयम्भुब्रह्मसञ्ज्ञोऽसौ महानन्तगुणाकरः ।
अनादिकालतः सर्वदोषहीनः पुनातु माम् ॥ २३ ॥

समस्तलक्षणैः पूर्णः समस्तजगदीश्वरः ।
सज्ज्ञानानन्दभक्त्यादिगुणमानी पुनातु माम् ॥ २४ ॥

सविशेषं जगत्सर्वं भूतं भव्यं भवच्च यत् ।
आलोचनाच्च यज्ज्ञाने भासते स युवाऽवतात् ॥ २५ ॥

असार्वत्रिकमीशे तु तथैवानादिनित्यकम् ।
ज्ञानं प्रवर्द्धमानं स्याद् आमुक्तेर्यस्य सोऽवतात् ॥ २६ ॥

सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वो गुणाधिकः ।
पारोक्ष्येण तु पूर्णं स्याद् यस्य ज्ञानं स पातु माम् ॥ २७ ॥

यस्मिन्नोतमिदं सर्वं चेतनाचेतनात्मकम् ।
अनादितोऽप्यापरोक्ष्यज्ञानयुक्तः स पातु माम् ॥ २८ ॥

सर्ववेदाधिकज्ञानो महाप्रतिभया युतः ।
वेदैः संवादितामात्रं यस्य ज्ञाने स पातु माम् ॥ २९ ॥

बलमेधाधृतिस्थैर्यज्ञानवैराग्यमानवान् ।
भूभारहारिणो विष्णोः प्रधानाङ्गं पुनातु माम् ॥ ३० ॥

योऽस्मि नित्यास्तितामानाद् योऽहं चासावहेयतः ।
तस्य विष्णोः सन्निधानपात्रीभूतोऽनिलोऽवतात् ॥ ३१ ॥

उपस्थातृषु यः पुण्यराशिं सूते दिने दिने ।
स एव सविता सोमः सोमबिम्बगतोऽवतात् ॥ ३२ ॥

येन देवाः पवित्रेण स्वात्मानं पुनते सदा ।
तेन सहस्रधारेण पवमानः पुनातु माम् ॥ ३३ ॥

आनन्दानुभवस्यापि विमुक्तेरपि स प्रभुः ।
वेदानां चैव लोकानाम् अभिमानी पुनातु माम् ॥ ३४ ॥

औत्पत्तिकगुणस्यापि ह्यभिमानी जगद्गुरुः ।
सर्वप्राणिषु संस्थः सन् पातु मां श्रीप्रभञ्जनः ॥ ३५ ॥

इन्द्रियाणां प्रवृत्तौ तु स्थित एव करोत्ययम् ।
मुख्यप्राणो महान् योऽसौ चेतिष्ठः स पुनातु माम् ॥ ३६ ॥

भूतानि चेष्टा मन्त्राश्च मुख्यप्राणादिदं जगत् ।
मुख्यप्राणः परस्माद् यो जातः स ब्राह्मणोऽवतात् ॥ ३७ ॥

श्रीहरिकृपया सर्वं जगद्व्याप्य तु तिष्ठति ।
छन्दांसि यस्य लोमादावाश्रितानि स पातु माम् ॥ ३८ ॥

स्वच्छकौशेयवसनः काम्यकर्मविवर्जितः ।
पद्माक्षतुलसीमालः शुचिः प्राणः पुनातु माम् ॥ ३९ ॥

जयासङ्कर्षणौ यस्य पितरौ स भवान् शिशुः ।
अयास्यः सुस्वरू रुद्रो धारवाकः पुनातु माम् ॥ ४० ॥

वायोर्यस्यावतारेषु ह्यपरोक्ष्योज्झितिः क्वचित् ।
सोऽतिरोहितविज्ञानः पुरुहूतः पुनातु माम् ॥ ४१ ॥

भूतानि मात्राश्चेष्टाश्च यस्मात् प्राणादिदं जगत् ।
एको हि कर्ता सर्वस्य सुविदत्रः स पातु माम् ॥ ४२ ॥

प्राणो मृत्युप्रदश्चायं मुक्तानामपि जीवनम् ।
स एव जीवनकरः पूर्ण ओजः सहोऽवतात् ॥ ४३ ॥

सूर्यचन्द्राग्निपर्जन्यपृथिव्यन्नादिषु स्थितः ।
आशादिस्थस्तथा सर्वदेवर्ष्यादिगतोऽवतात् ॥ ४४ ॥

वायुर्गोवत्सरूपेण सर्वप्राणिषु संस्थितः ।
जीवस्य सूक्ष्मदेहो हि गृहं यस्य स पातु माम् ॥ ४५ ॥

अन्नं दामात्मकं तस्य स्थूणा तु भगवान् हरिः ।
जीवस्य स्थूलदेहो हि वितानं यस्य सोऽवतात् ॥ ४६ ॥

दक्षिणाक्षिस्थितो वायुः सप्तदेवैरुपासितः ।
स्थूणया विष्णुना सार्द्धं योऽस्ति प्राणः स पातु माम् ॥ ४७ ॥

घर्मा समन्ताच्छ्रुत्याऽसौ स्वरूपेन्द्रियदेहगः ।
मातरिश्वाभिधानो यः पुरुनिष्ठः स पातु माम् ॥ ४८ ॥

सुपर्णशेषरुद्रादितत्त्वदेवाभिधानवान् ।
जीवस्वरूपगश्रीशसेवासक्तः पुनातु माम् ॥ ४९ ॥

हरेराज्ञानुसारेण तत्त्वकार्याणि नित्यशः ।
जीवस्वरूपगः कुर्वन् बिम्बवद् योऽस्ति सोऽवतात् ॥ ५० ॥

यो हि लिङ्गशरीरस्थः सूत्रनामा महाप्रभुः ।
स्थूलदेहगतः सोऽसौ मुख्यप्राणः पुनातु माम् ॥ ५१ ॥

स्वरूपदेहबुद्ध्यादिस्थितो योऽसौ पुरोगवः ।
प्रेरयत्यखिलं विश्वं स वसिष्ठः पुनातु माम् ॥ ५२ ॥

सूक्ष्मदेहगतः प्राणः पवमानो वृषा हरिः ।
स्थूलदेहेन्द्रियस्थश्च स एषोऽसुः पुनातु माम् ॥ ५३ ॥

प्राण एको वशी नित्यं बाह्यान्तःकरणेश्वरः ।
यस्येशो भगवान् विष्णुः स आदित्यः पुनातु माम् ॥ ५४ ॥

यस्य नैवासुरावेशः स षोडशकलो विभुः ।
सर्वजीवस्वरूपान्तर्वासी वेधाः पुनातु माम् ॥ ५५ ॥

उत्तमः सर्वदेवेषु प्राण एव हरेरनु ।
हंसोपास्तिः श्वासरूपो व्रतं यस्य स पातु माम् ॥ ५६ ॥

वायुः संवत्सरः प्रोक्तो वत्सो विष्णोरसौ यतः ।
सम्यगेव रतिं याति मध्यमो यः स पातु माम् ॥ ५७ ॥

पञ्चरूपी स सर्वत्र सह पञ्चात्मविष्णुना ।
बृहत्युक्थादिषु तथा नानारूपैः स्थितोऽवतात् ॥ ५८ ॥

योऽनन्तानन्तरूपेण जगद्यमयतीश्वरः ।
बृहतीसहस्रवाच्यश्च तावद्रूपः स पातु माम् ॥ ५९ ॥

अमृतो वायुरुद्दिष्टो नित्यज्ञानात्मकत्वतः ।
सर्वत्र विनिविष्टः सन् सद्गुरिः पावनोऽवतात् ॥ ६० ॥

प्राणो निरभिमानित्वात् शरीर्यप्यशरीरवान् ।
सत्वप्रचुर ईशानो जिष्णुर्धृष्णुः पुनातु माम् ॥ ६१ ॥

नान्नादिना वपोर्यस्य वृद्धिह्रासौ कथञ्चन ।
जगत्प्राणः स वाणीशो वैष्णवाग्रेसरोऽवतात् ॥ ६२ ॥

जाग्रत्स्वप्नसुषुप्त्यादिसर्वावस्थानियामकः ।
सर्वत्रगः सर्वनामा सर्ववेदाभिधोऽवतात् ॥ ६३ ॥

अनन्ताम्नायवेद्योऽसौ विना विष्णौ प्रसिद्धतः ।
वेदवर्णपुराणादौ तत्तन्नाम्ना स्थितोऽवतात् ॥ ६४ ॥

नित्यपूर्णगुणत्वाच्च हरेः प्रियतमत्वतः ।
अशक्याप्राप्यराहित्याद् अध्यर्द्धो यः स पातु माम् ॥ ६५ ॥

समस्तगुणभोक्तृत्वात् पूर्णानन्दतरः स्मृतः ।
भोग्यभोक्त्रात्मना योऽस्ति स्वयमेव स पातु माम् ॥ ६६ ॥

हनुमद्भीमसेनश्रीपूर्णप्रज्ञाख्यरूपिणम् ।
श्रीवायुं भारतीसेव्यं सेवे सर्वेष्टसिद्धये ॥ ६७ ॥

त्रिकोटिरूपं तं हंसं श्वासोच्छ्वासप्रवर्त्तकम् ।
आखणाश्मसमं व्यष्टिं समष्टिं भरतं भजे ॥ ६८ ॥

पञ्चहोता पुमान् धाय्या त्वष्टा श्रीशपदार्चकः ।
प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म प्रपुनातु माम् ॥ ६९ ॥

स सूत्रात्मा समुद्दिष्टो वायुर्लोकप्रणायकः ।
दाश्वान् प्राणो य आशाया भूयान् स पावनोऽवतात् ॥ ७० ॥

सर्वदेवोत्तमो वायुः सर्वलोकपितामहः ।
एकवीरो रोचनाख्यः स इन्द्रो मारुतोऽवतात् ॥ ७१ ॥

प्रधानं धाम विष्णोस्तु वायुरेव प्रकीर्तितः ।
अनुप्राणन्ति यं देवाः स श्रीप्राणः पुनातु माम् ॥ ७२ ॥

गदायुधहतिच्छिन्नजीवलिङ्गस्वरूपकः ।
अन्तर्बहिर्व्यापकश्च दीनबन्धुः पुनातु माम् ॥ ७३ ॥

आञ्जनेयो महावीरः कृपासिन्धुः पुरुष्टुतः ।
तुराषाड् अक्रतुः प्राणो भाविब्रह्मा पुनातु माम् ॥ ७४ ॥

स्यूतं जगदिदं यस्मिन् सूत्रं वायुरसौ स्मृतः ।
विभीषणो महाकायो हिङ्कारः स पुनातु माम् ॥ ७५ ॥

चिरञ्जीवी प्रसन्नात्मा श्रीरामध्यानतत्परः ।
रामसुग्रीवसन्धाता राममुद्राधरोऽवतात् ॥ ७६ ॥

दुष्टराक्षससंहारो दशग्रीवस्य दर्पहा ।
जानकीप्रियसँल्लापश्चूडामणिधरोऽवतात् ॥ ७७ ॥

गोष्पदीकृतवाराशिः पिङ्गाक्षोऽमितविक्रमः ।
सर्वभूतान्तरात्मा श्रीपवमानः पुनातु माम् ॥ ७८ ॥

सीतावृत्तान्तसंहृष्टरामालिङ्गितविग्रहः ।
प्रसूनीकृतशैलेन्द्रः सुतेजिष्ठः पुनातु माम् ॥ ७९ ॥

सञ्जीवननगाहर्त्ता सौमित्रिप्राणरक्षकः ।
अपमृत्युहरः शूरः पुरुरूपः पुनातु माम् ॥ ८० ॥

प्राणिनां प्राणभूतो हि पाण्डवो विप्रपालकः ।
द्रौपदीवल्लभो भीमो देवश्रेष्ठः पुनातु माम् ॥ ८१ ॥

द्यावाभूमी समाकृष्य घट्टयिष्यन् शिले इव ।
भद्रान् पराक्रमान् कुर्वन् भीमसेनः पुनातु माम् ॥ ८२ ॥

नृसिंहोपासनासक्तो महाभागवतोत्तमः ।
महत्तत्त्वात्मको भीमः पुरुभोजः पुनातु माम् ॥ ८३ ॥

विष्णोः पदे मध्व उत्सः सर्वजीवाधिको गुरुः ।
ऋजुयोगो व्यासशिष्यः सोऽसौ जीवघनोऽवतात् ॥ ८४ ॥

शास्त्राब्धिवृद्धिपूर्णेन्दुर्गीर्वाणगणसेवितः ।
श्रीप्राणनायको विद्वान् मध्वो नारायणोऽवतात् ॥ ८५ ॥

आनन्दतीर्थसन्नामा कलिकल्मषनाशनः ।
अध्यात्मज्ञाननेता स विश्वशम्भुः पुनातु माम् ॥ ८६ ॥

ब्रह्मणस्पतिमुद्गीथं क्षत्रं पूर्णगुणं तरुम् ।
आकाशम् उक्थं संवर्गं सोमं सर्वायुषं भजे ॥ ८७ ॥

हरिभक्त्यैव सन्तृप्तं मोक्षादीच्छाविवर्जितम् ।
सर्वज्ञानोपदेष्टारं दीक्षाम् आङ्गिरसं भजे ॥ ८८ ॥

अङ्गीभूताग्निनेतृत्वाद् अङ्गेष्वग्निशिखा नयन् ।
प्राणाग्निरिति यः प्रोक्तः स एवाग्निस्थितोऽवतात् ॥ ८९ ॥

धर्मो ज्ञानञ्च वैराग्यम् ऐश्वर्यं चतुरात्मकः ।
सुवीरो व्रतभृत् प्राणो वृत्रहा दस्युहाऽवतात् ॥ ९० ॥

स्वयम्भूरभिभूत्योजाः शुक्रशोचिः शुचिव्रतः ।
विज्ञातवीर्यो वायुर्वै क्षेपिष्ठा देवताऽवतात् ॥ ९१ ॥

अमर्त्योऽकृत्तरुक् प्राणो वेदिषद् भाम एकजः ।
पुरूरवा विश्वधायो मरुत्वान् पावनोऽवतात् ॥ ९२ ॥

वेदः पाजो वशी वज्री सहावान् अनवब्रवः ।
विजेषकृत् सर्ववीरो ज्योतिष्मान् पावकोऽवतात् ॥ ९३ ॥

व्रात्योऽभिमातिषाहो यः पुरुचेतन आघृणिः ।
परे तत्त्वे विशुद्धोऽसौ स श्रीवायुः पुनातु माम् ॥ ९४ ॥

सप्तस्वसॄरिति श्रुत्या मध्वः प्रस्तूयते भवान् ।
सत्यो वाध्वो महाराजो वेदाणी स पुनातु माम् ॥ ९५ ॥

पञ्चवृत्तिस्त्विन्द्रियाणां नियन्ता प्राण एकराट् ।
माहाचमस्यो गायत्री श्रीविष्णोर्वशगोऽवतात् ॥ ९६ ॥

महायोगेश्वरेशेशो जातवेदास्तनूनपात् ।
सुरूपकृत्तुरध्वर्युः पृथग्वर्त्मा पुनातु माम् ॥ ९७ ॥

नभसस्पतिरुद्गाता पूषा माध्यन्दिनः स्वरः ।
अघ्न्यो हिरण्यगर्भः कः स्तोता तेजः पुनातु माम् ॥ ९८ ॥

यस्मिन्नाहुतिदानेन भूसुरः पुण्यभाग् भवेत् ।
प्राणाग्निहोत्रगो मुख्यो मुख्यप्राणः स पातु माम् ॥ ९९ ॥

वसुरन्तरिक्षसद्धोता विश्वकर्मा पुरोहितः ।
उग्रो वैश्वानरो यज्ञो यमो जैत्रः पुनातु माम् ॥ १०० ॥

पुरुषस्त्रैष्टुभो विश्वो वषट्कारोऽनुवत्सरः ।
द्युतानः सविता सप्तिः स्रुवो मित्रः पुनातु माम् ॥ १०१ ॥

साधुराशुस्त्रिवृत् ताक्ष्यों ज्येष्ठः श्रेष्ठः प्रजापतिः ।
एकपात् सरिरो वातो योऽनिरुक्तः स पातु माम् ॥ १०२ ॥

अज्ञानाभिभवास्पृष्टो निस्सीमगुणबृंहितः ।
सम्राड् अखण्डशक्तिः स सत्यधर्मा पुनातु माम् ॥ १०३ ॥

विषमप्यमृतीकृत्य यः पपौ स कुनन्नभा ।
छन्दोमयो गिरिः केशी महाबुद्धिः पुनातु माम् ॥ १०४ ॥

सप्तस्कन्धगतो लोकान् यो बिभर्ति महाबलः ।
सोऽच्छिन्नभगवद्धर्मा पुनीयान्मां बृहस्पतिः ॥ १०५ ॥

प्राणादिदशरूपोऽसौ योऽध्यात्मादिगतः प्रभुः ।
नित्यापहतपाप्मा स गमयन् ब्रह्म पातु माम् ॥ १०६ ॥

रमादेव्या ज्येष्ठपुत्रः प्रत्यक्षं ब्रह्म मारुतः ।
विशिष्टप्रतिमा विष्णोः परशुक्रः पुनातु माम् ॥ १०७ ॥

पदप्रदश्च देवानां तत्तच्छक्तिप्रदः कविः ।
यन्ता स नित्यसञ्चारी पातु सर्वप्रवृत्तिमान् ॥ १०८ ॥

अजो विष्णुमताभिज्ञो जालाजालः क्षरोऽक्षरः ।
सर्वतत्त्वाभिमानी स मुक्तप्रायः पुनातु माम् ॥ १०९ ॥

श्रीशाखण्डविभूतेस्स ह्यधिष्ठानं महागुरुः ।
उक्थ्य आधारपो योगो वायुदेवः पुनातु माम् ॥ ११० ॥

अमूर्त्तप्रतिमा विष्णोः सर्वस्वामी महामतिः ।
अर्धनारीनरवपुः पातु मां ज्योतिषाम्पतिः ॥ १११ ॥

अनुत्साहो महोत्साहचूडामणिगतो विभुः ।
सर्वजीवनिकायेषु हरेर्विद् वृषभोऽवतात् ॥ ११२ ॥

सोऽयं प्रलयकालेऽपि प्रतिभातपरावरः ।
मुख्यवायुर्नित्यसमो हरेर्बन्धुः पुनातु माम् ॥ ११३ ॥

सत्त्वात्मकशरीरोऽसौ यो नभस्वान् अणुर्महान् ।
विश्वम्भरः सुखं ज्ञानम् आदिगोपः स पातु माम् ॥ ११४ ॥

असमोऽसौ प्रसेनानीः प्रज्ञा सूत्रं धृतिः स्मृतिः ।
मेधा मुक्तिर्विष्णुभक्तिः प्राण उत् सत् पुनातु माम् ॥ ११५ ॥

ऋजुयोगरतो ब्रह्मा बलं चित्तं वृकोदरः ।
महाध्याता च विज्ञाता वैराग्यं पातु मां स्थितिः ॥ ११६ ॥

सत्याभिमानवान् आत्मा धर्मज्ञो भगवान् असुः ।
हनूमान् भीम आनन्दो भूरिजन्मा पुनातु माम् ॥ ११७ ॥

कालजीवगुणादीनामभिमानी जगत्पतिः ।
शब्दब्रह्मात्मको वायुः पुरुषो मानवोऽवतात् ॥ ११८ ॥

संवृङ्क्ते सर्वदेवान् यद् वायुः संवर्ग ईरितः ।
वेदवेदाङ्गतत्त्वज्ञः स्वर्णवर्णः स पातु माम् ॥ ११९ ॥

ऊर्ध्वपुण्ड्रधरः शङ्खचक्राङ्कितभुजो मरुत् ।
शुद्धे भागवते धर्मे निरतो मध्यमोऽवतात् ॥ १२० ॥

इन्दुरिन्द्रस्तुरो योगी प्रचेताः प्रणवो ग्रहः ।
विवस्वान् वैष्णवाचार्यो विश्वज्योतिः पुनातु माम् ॥ १२१ ॥

ओंवाङ् ज्योतीरथः श्वेतः श्वरूपोऽन्नपतिः पशुः ।
शुद्धान्तःकरणः साक्षी भर्गो भ्राता स्वसाऽवतात् ॥ १२२ ॥

महौजाः प्राणमुख्यो यो गर्भदुःखविवर्जितः ।
श्रीमध्वः सप्तस्वसृणां भ्राता प्राज्ञः स पातु माम् ॥ १२३ ॥

यस्मिन् प्रतिष्ठितं सर्वं रथनाभावरा यथा ।
तस्मै स्वधर्मनिष्ठाय पुंसे श्रीऋजवे नमः ॥ १२४ ॥

नमो नमः श्रीहरये नमः श्रीवायवे तथा ।
नमो नमो देवताभ्यो गुरुभ्यश्च नमो नमः ॥ १२५ ॥

जयन्ति सन्ततं सन्तो विष्णुभक्ता महोज्ज्वलाः ।
श्रीमध्वशास्त्रसम्पन्नाः संसारायासहारिणः ॥ १२६ ॥

सुपर्णशेषरुद्राद्याः सपत्नीका दिवौकसः ।
न शक्ताः सर्वथा स्तोतुं पवमानगुणान् समान् ॥ १२७ ॥

गुरुभक्त्या हरौ भक्तिर्नूनं भवति निर्मला ।
तया सर्वं समाप्नोति तस्मादेनां नुतिं पठेत् ॥ १२८ ॥

समस्तविपदुच्छेदां त्रिविक्रमबुधैः कृताम् ।
श्रीमद्वायुस्तुतिं भक्त्या समुच्चार्य पठन्त्विमाम् ॥ १२९ ॥

श्रीयुक्तिमल्लिकां श्रीमन्माध्वग्रन्थान् शुभप्रदान् ।
हरिकथामृतसारादीन् समुच्चार्य पठन्त्विमाम् ॥ १३० ॥

आचार्यः पवनोऽस्माकम् आचार्याणी च भारती ।
देवो नारायणः श्रीशो देवी मङ्गलदेवता ॥ १३१ ॥

सम्पूर्णानन्दभाग् गोत्रो हंसो हंसरहस्यकृत् ।
लातव्यो भाविवायुः श्रीवादिराजः पुनातु माम् ॥ १३२ ॥

बह्वीः समा इति श्रुत्या योंऽहोनाशं करिष्यति ।
वृन्दावनस्थः सोऽग्रेगो राजाऽप्योऽवतु वादिराट् ॥ १३३ ॥

अष्टौ वाग्वज्रधारा दुरितकुलमहामूलदाहेऽतिशूरा
दण्डप्रोद्धासिहस्ताः स्फुरदसिसन्मार्गसक्ता विरक्ताः ।
श्रीकृष्णस्नेहपाशाः श्रमहरगतयो रूप्यपीठाधिवासा
योगीन्द्राश्चित्रलोकाधिपनिभविभवा मध्वदासा जयन्ति ॥ १३४ ॥

नमः श्रीजयतीर्थाय नमः श्रीव्यासयोगिने ।
नमः श्रीराघवेन्द्राय नमः सत्यव्रताय च ॥ १३५ ॥

विजयध्वजतीर्थान् श्रीरघूत्तममहागुरून् ।
श्रीरामचन्द्रभिक्षून् श्रीविद्याधीशादिकान् भजे ॥ १३६ ॥

श्रीसत्यनिधितीर्थं श्रीसत्यनाथमुनिं तथा ।
श्रीश्रीनिवासतीर्थं श्रीयादवाचार्यमाश्रये ॥ १३७ ॥

श्रीमदारण्यकाचार्यं सत्यधर्मतपस्विनम् ।
श्रीरघुप्रेमतीर्थं श्रीसत्यध्यानगुरुं श्रये ॥ १३८ ॥

अज्ञाननिद्राविद्राणसुप्रभातप्रभाकरान् ।
श्रीमत्सत्यप्रमोदार्यान् मूलरामार्चकान् भजे ॥ १३९ ॥

विज्ञमानन्दतीर्थं तं ताम्रपर्णीकुलोद्भवम् ।
सत्तत्त्वरत्नमालाख्यग्रन्थकारं स्मराम्यहम् ॥ १४० ॥

वंशावतंसं तं कोच्चीरङ्गप्पाचार्यनामकम् ।
विश्वप्रियगुरोरौपसदं प्राञ्चं नमाम्यहम् ॥ १४१ ॥

श्रीवादिराजमाचार्यं जम्बुखण्डीकुलोद्भवम् ।
भूतराजावतारं तं पुण्यात्मानं स्मराम्यहम् ॥ १४२ ॥

स्वाम्यवृन्दावनाख्यानरहस्यज्ञं गुणोज्ज्वलम् ।
वाळवेकरवंश्यं श्रीवेङ्कणाचार्यमाश्रये ॥ १४३ ॥

प्रणौमि षट्पुराचार्यं सुब्बरायबुधं तथा ।
श्रीब्रह्मदत्तमाचार्यं युधिष्ठिरगुरूरसम् ॥ १४४ ॥

सर्वमूलमहाशास्त्रजह्नुकन्याभगीरथम् ।
तन्त्रिनारायणं सूरिं पुण्यात्मानं स्मराम्यहम् ॥ १४५ ॥

वन्दे गलगलीवंश्यान् रामाचार्यान् बुधाग्रगान् ।
वालकोण्डनृसिंहार्यान् गोपालाचार्यमाहुलीन् ॥ १४६ ॥

दुष्टमोहविषद्रोहापोहगारुडमुज्ज्वलम् ।
सेवे तं दासवर्यं श्रीगुरुगोविन्दविट्ठलम् ॥ १४७ ॥

आर्यं श्रीमध्वसिद्धान्तवियद्विष्णुपदीधरम् ।
श्रीकृष्णमूर्तिशर्माणं भवानीवंशजं भजे ॥ १४८ ॥

ब्रह्मान्ता गुरवः साक्षाद् इष्टं दैवं श्रियःपतिः ।
आचार्याः श्रीमदाचार्याः सन्तु मे जन्मजन्मनि ॥ १४९ ॥

अशेषगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥ १५० ॥

नान्यं भजामि न स्तौमि नानुयामि कदाचन ।
हरिं च हरिपत्नीं च सुरादींश्च गुरून् विना ॥ १५१ ॥

श्रीभूदुर्गासमारम्भां श्रीपुरन्दरमध्यमाम् ।
हरिनारायणार्यान्तां वन्दे दासपरम्पराम् ॥ १५२ ॥

हितं न जानाम्यहितं न जाने नाकर्त्तुमीशो न च कर्त्तुमीशः ।
यथा नटान्नाटकदारुयन्त्रं तथा हरेः प्रेरणयैव वर्त्ते ॥ १५३ ॥

श्रीरमापद्मनाभाख्यौ पितरौ मम सादरम् ।
अज्ञ आनन्दतीर्थोऽहम् उपतिष्ठे नमन् नुवन् ॥ १५४ ॥

प्रणौमि मामिडेलश्रीसीतारामविपश्चितः ।
ऋग्वेदपण्डितान् पूज्यान् सुब्रह्मण्यगुरून् भजे ॥ १५५ ॥

सतां सकाशतो ज्ञानकणान् सम्भिक्ष्य भक्तितः ।
जीवोत्तमपदद्वन्द्वे नुतिरेषा समर्पिता ॥ १५६ ॥

नमो निरस्तदोषाय समस्तगुणराशये ।
विमलानन्ददेहाय कमलापतये सदा ॥ १५७ ॥

श्रीवादिराजतीर्थार्यहृत्सरोजाख्यमन्दिरः ।
इन्दिराराध्यपादाब्जः प्रीयतां श्रीहयाननः ॥ १५८ ॥

विद्यारण्यविहारिणः सुनिपुणाः शास्त्रार्थसङ्ग्राहने,
ग्रन्थग्रन्थिविभेदिनोऽतिपटवो मायातमश्शातने ।
क्रूराः पण्डितमानिने सहृदयाः शिष्येषु ये वत्सलाः,
शान्ताः सज्जनसङ्गतेषु कुशलास्तेभ्यो गुरुभ्यो नमः ॥ १५९ ॥

तत्त्वज्ञानसुधासमुद्रलहरी, मोक्षेन्दुदुग्धोदधिः,
गर्त्ताज्ञानतमोवितानमलिनीभूतात्मनां दीपिका ।
श्रेयःश्रेणिलताम्बुसेकरचना, सम्पन्मृगीवागुरा,
सैषा प्राणनुतिः शुभा बुधमनस्तोषाय भूयात् सदा ॥ १६० ॥

दृगन्तपातेन विपश्चितश्चेन्मनागपीमामवलोकयन्ति ।
आनन्दतीर्थस्य कृतिः कृतार्था तदा भवेत् प्राणनुतिः किलेयम् ॥ १६१ ॥

अस्वतन्त्रे मयि स्थित्वा स्वतन्त्रो भगवान् हरिः ।
कलिविध्वंसिनीं श्रीमज्जीवोत्तमनुतिं व्यधात् ॥ १६२ ॥

॥ इति श्रीजीवोत्तमनुतिः सम्पूर्णा ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवार्पणमस्तु ॥

## ॥ लघुविवरणम् ॥

१ श्लोके—सविता=विष्णुः । ‘स्रष्टृत्वात् सविता विष्णुः’ इति ऋग्भाष्यम् । ‘उद्यद्रविप्रकरसन्निभमच्युताङ्के स्वासीनमस्य नुतिनित्यवचःप्रवृत्तिम् । ध्यायेद्गदा-भयकरं सुकृताञ्जलिं तं प्राणं यथेष्टतनुमुन्नतकर्मशक्तिम् ॥’ इति तन्त्रसारसङ्ग्रहः । मन्यो=ज्ञानिन् ! । ‘मनु अवबोधन इति धातोर्मन्युरिति ज्ञानी’ इति कर्मनिर्णयः ।

२ श्लोके—अहो=विचित्रम् । ओदन्तो निपातः । ओदन्तत्वात् प्रगृह्यत्वम् । ‘बिभर्त्यण्डं हरिः कूर्मस्त्वण्डे चाप्युदकं महत् । उदके कूर्मरूपस्य वायुः पुच्छं समाश्रितः । वायो पुच्छं समाश्रित्य शेषस्तु पृथिवीमिमाम् । बिभर्ति’ इति, ‘उपास्ते कूर्मरूपं यो वायुं संस्थितिमाप्नुयात् । इच्छया विनिवृत्तिं वा लोकश्चा-वृत्तिवर्जितम् ।’ इति च बृहद्भाष्यम् । बोधानः=तत्त्वोपदेष्टा गुरुः । ‘गुरु-र्दिशानो बोधानः’ इति वैजयन्ती ।

३ श्लोके—‘विशिष्टप्रतिमा’ इत्यत्र ‘प्रह्वे वा’ इत्यनुशासनात् संयोग-पूर्वस्यापि गुरुता विकल्पिता । गोवत्सः=गोवत्सरूपो वायुः । ‘वायुर्गोवत्सरूपेण’ इति बृहद्भाष्यम् । ‘उत्स औत्सुक्यवान् मध्वः’ इति श्रीयुक्तिमल्लिकाफल-सौरभम् (६७३) । ‘विष्णोः पदे परमे मध्व उत्सः’ इति हि श्रुतिः । ‘उत्सशब्दोवज्ञशब्द इव ज्ञान्यर्थः’ इति श्रीमन्युसूक्तसत्यप्रमोदिनी । ‘उत्सः= उन्नत्ति क्लिद्यतीत्युत्सः, जलप्रस्रवणस्थानम् ऋषिर्वा’ इति ऋग्व्याख्या । महान्= प्राणः । ‘न ह्यन्यः प्रियो ब्रह्मणः’ इति श्रुतिः । स शिशुः । मातरिश्वा= ‘टुओश्विगतिवृद्ध्योरिति धातोः मातरि सर्वप्रमातरि हरौ सर्वकर्मणाम् अर्पणरूपा गतिर्यस्मात् स हि मातरिश्वा’ इतीशावास्यभाष्यटीकाभावप्रकाशिकायां श्रीभावि-समीराः ॥ ‘स्वराट्=सर्वसुराधिपतिर्ब्रह्मा वायुर्वा’ इत्यनन्ततीर्थाः श्रीमद्भागवत-व्याख्यायाम् (३-२५-१०)। भोशब्द ओदन्तः । ‘स्यूतं जगदिदं यस्मिन् सूत्रं वायुरसौ स्मृतः’ इति बृहद्भाष्यम् (५-७-१) मनो=वायो । ‘ते मनवे वायवे’ इति ऋग्भाष्यम् । ‘मनवो बोधवैशद्याद् देवा ब्रह्मादयः स्मृताः’ इति सर्वमूलम् ।

४ श्लोके—प्रधीः=प्रध्यायतीति प्रधीः । ध्यायतेः सम्प्रसारणश्चेति क्विपि सम्प्रसारणे पूर्वरूपे च कृते हलः इति दीर्घः । सामाभिधानः=‘साम वाग्वै सामैष सा अमश्चेति तत्साम्नः सामत्वम्’ इति बृहदारण्यकम् (७-३-२२)। ‘वायुरेव साम’ इति जैमिनीयब्राह्मणम् (३-१-१२) । यजुः=‘प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते’ इति बृहदारण्यकम् (१-१३-१२)। ‘प्राण एव यजुः’ इति शतपथम् (१०-३-५-४)।

५ श्लोके—ऊर्मिका=अङ्गुलीयकम् । ‘स भवान्, इह भवान्, तत्र भवान्, ततो भवान्’ इत्यादयः शब्दा ‘इतराभ्योऽपि दृश्यन्ते’ इति साधवः । युष्मदर्थे भवान् । (भवदादिभिर्योगे इति वक्तव्यम्)। ‘भवत् शब्द प्रथमपुरुष के स्थान में प्रयुक्त होता है, इसके साथ प्रथम पुरुष की ही क्रिया लगती है। यथा—‘भवान् गच्छतु’ इति। ‘विराड् ब्रह्मा समुद्दिष्टः’ इति भागवततात्पर्यम् (२-९-५४)।

६ श्लोके—रमा=लक्ष्मीः भार्या वा । ‘कामतो विधिरुद्रादिपददात्र्या स्वयं श्रिया’ इति जिज्ञासाधिकरणानुव्याख्यानम् । तथा च तत्रैव सुधा—‘अत्र हि यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधामित्यादिनाऽस्या अम्भृण्या वाचः स्वेच्छामात्रेण ब्रह्मरुद्रादिपददातृत्वं प्रतीयते । न चैतत् श्रियं विनाऽन्यस्या युक्तम् अन्यासां ब्रह्मसृष्टत्वात्’ इति । ‘आर्त्ते मयि प्रीयताम्’ स भवान् इति वर्त्तते।

७ श्लोके—गङ्गीयन्तीति—‘मालिन्यं व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्योः’ इति कविसम्प्रदायात् कीर्तिः शुक्ला वर्ण्यते । तथाहि—परशुक्लत्र-यान्तर्गतस्य पवनस्य कीर्त्तेः सङ्घट्टतः अशुक्ला अपि पदार्थाः शुक्ला वर्ण्यते । हनुमतः कीर्त्तेः सङ्घट्टनात् सदा समस्तसरितो गङ्गीयन्ति गङ्गेवाचरन्ति, शुक्ला भवन्तीत्यर्थः। अद्रयो गिरयः रौप्याचलन्ति विजयार्धवदाचरन्ति । नीलाब्जानि सिताम्बुजन्ति शुक्लकमलवदाचरन्ति । गजता हस्तिसमूहः, जम्भारिकुम्भीयति ऐरावतवदाचरति। अम्बुजबान्धवः सूर्यः, चन्द्रति चन्द्रवदाचरति । पिककुलं कोकिलसमूहः, लीलामरालायते क्रीडाहंसवदाचरति । कज्जलानि च कर्पूरन्ति घनसारवदाचरन्ति। तद्गुणानुप्राणितोपमालङ्कारोऽत्र बोध्यः ।

८ श्लोके—दूः=“स वा एष देवता दूर्नाम दूरं ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद’ इति बृहदारण्यकम् (३-३-९) (यारु ‘दूः’ एंदु प्राणनन्नु तिळियुत्तारो अवरिगे मृत्युवु दूरवागुत्तदे)। द्युभर्त्ता=‘भविष्य-द्विधात्रे द्युभर्त्रे’ इति वायुस्तुतिः। ‘दिवो ज्ञानादिगुणसम्पन्नाया भारत्याः, दीव्यतेः क्विप्, भर्त्रे तुभ्यम्’ इति श्रीविश्वपतितीर्थीयम्।

९ श्लोके—महानारायणास्त्रम्=‘नारायणास्त्रेण महता’ इति महाभारतम् (द्रोणपर्वणि १९४-४०)॥

१० श्लोके—‘अयं वाव शिशुर्योऽयं मध्यमः प्राणः’ इति श्रुतिः। ‘दुःखासम्पीडितत्वात्तु मध्यमो वायुरुच्यते’ इति गीतातात्पर्यनिर्णयः (७-७)। (जय)=युक्तपरत्वाभावेऽपि विषमपादान्ते लघोर्गुरुता शार्दूलादिष्वपि वृत्तेषु विकल्पिता, इह श्रीमदमितगतिश्रीमङ्खश्रीब्रह्मदत्तजिज्ञासुश्रीनित्यानन्दश्रीगलगली-रामाचार्यादयः प्रमाणम्।

१२ श्लोके—कल्पपदपः=कल्पपादपः। क्षुद्राभ्रमरवटरपादपादञ् इत्यत्र ‘अन्ये तु पादपशब्दस्य स्थाने पदपशब्दं पठन्ति’ इति हरदत्तः। पृक्षः= ‘सेनावाचकपृत्पदोपपदात् क्षीङ्क्षय इति धातोः औणादिके डसन् प्रत्यये कृते कौरवसेनायाः क्षयो यस्मात् पृक्षः, धर्मद्रोहतो नष्टप्रायत्वद्योतनाय पृदित्यत्र तकार-लोपः’ इति महाभारततात्पर्यनिर्णयभावप्राशिकायां श्रीभाविसमीराः (२१-१८०)। पृक्षोऽस्यास्ती पृक्षः, मत्वर्थीयोऽकारः। विद्युत्पतिः=वायुः। ‘विद्युत्पत्ति-र्वायुरेव’ इति ब्रह्मसूत्रभाष्यम् (४-३-६) ‘विद्युत्पतिः=भारतीभर्त्ता’ इति भाष्यदीपिका। भृतमः=‘भृताः पूर्णाः माः प्रमाः प्रमाणानि यस्मिन्नसौ तथोक्तः’ इति बृहदारण्यकभावबोधः (८-५)। भृतमो भीमः। ‘वायुरेव महः’ इति गोपथम् (१-५-२५) समुद्रः=‘अयं वै समुद्रः योऽयं पवत एतस्माद् वै समुद्रात् सर्वे देवाः सर्वाणि भूतानि समुद्रवन्ति’ इति शतपथम् (१४-२-२-२)। ‘स एवायं पवत एष एव स समुद्र एतं हि संद्रवन्ति सर्वाणि भूतान्यनुसन्द्रवन्ति’ इति च जैमिनीयब्राह्मणम् (१-२५-४)। समुद्रः=प्राणः। महः=‘पूर्णत्वान्महः’ इति तैत्तरीयखण्डार्थः (१-१३)।

१३ श्लोके—'बुध्नः=ज्ञानरूपः' इत्यभिनवचन्द्रिका । 'बुध्नः=यो बोधयति सर्वान् पदार्थान् वेदद्वारा सः' इति श्रीस्वामिचरणाः । लोकम्पृणः=पृणधातुः प्रीणनार्थः । 'पृणधातुः पूरणकर्मा' इति कैयटहरदत्तौ । 'लोकस्य पृणे' इति कात्यायनवचनान्मुम् । मूलविभुजादित्वात् कः । यातिन् इति इन्नन्तः ।

१४ श्लोके—विश्राणयन्=' श्रणदाने ' चौरादिकोऽयं धातुः प्रायेण विपूर्वः ।

१५ श्लोके—' भूमन्=हर्येकाधीन ! गुणपूर्ण ! हे ! मुख्यप्राण ! ' इति श्रीवायुस्तुतिव्याख्या छलारीया । धरुणः=' पृथिव्या धरुणो मध्वः ' इति श्रुतिः । ' साकल्येन जगद्धारणस्वभावो वायुः ' श्रीसत्यप्रमोदिनी । " मिथ्यात्त्वज्ञाननाशत उद्धारात् साधूनां गुरुत्वेनोद्धारकत्वाद् धरुणो धारणशीलः ' इति सुरोत्तमीयम् ॥

१६ श्लोके—नाभीदेषु=भारतेवर्षे । ' नाभीदं भारतं वर्षम् ' इति यादवः । विषयवाचित्वादादराद्वा भूम्नि । अधिबदरि=बदर्याम् ।

१७ श्लोके—उक्तञ्च पञ्चरात्रे संहितायाम्—' दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः । ' इति ।

१८ श्लोके—' तापत्रयापहम् इति विशेषणं युक्तम् । तापत्रयम् आध्यात्मिकादित्रयमपहन्तीति विग्रहः ' इति लब्धामोदः ।

१९ श्लोके—वज्रसायकः=' विभिद्य प्राणान् हरति शरं तत्स्वरूपः । रावणवधार्थं रामधनुर्विनिर्मुक्तः सायको मुख्यप्राण एव । ' पञ्चात्मको मारुत एव बाणः ' इति निर्णयः ' इति श्रीसत्यप्रमोदिनी ।

२० श्लोके—' सोमः पवते मतीनां जनिता ' इत्यादिश्रुतयः ।

२१ श्लोके—' स मध्व आयुवते, उन्मध्व ऊर्मिः, विद्वान् मध्वः, मध्वो अंशुः, प्रधारा मध्वः, अस्मभ्यमिन्दविन्द्रयुर्मध्वः, प्रसेनानीः, प्रावीविपत्, सोमः पवते, ब्रह्मादेवानाम् ' इत्यादिश्रुतयः । लोककृत्नुः=' श्रीशाज्ञया लोकस्य कर्ता लोककृत्नुः ' इति सत्यप्रमोदिनी ।

२२ श्लोके—सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्। शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा। (ऋक् ८-८९-३) इति श्रुतिः॥

२३ श्लोके—'असौ रूपत्रयविशिष्टो वायुः स्वस्मात् स्वयमेवोत्पन्नत्वात् स्वयंशब्दवाच्यविष्ण्वाज्ञयोत्पन्नत्वाद्वा स्वयम्भूः। ज्ञानादिगुणपूर्णत्वाद् ब्रह्मेति स्वयंभुब्रह्मसञ्ज्ञ इत्यर्थः' इति बृहद्भाष्यभावबोधः (८-५)। सर्वदोषहीनः=निर्दोषः। उक्तञ्च सुधायाम्—'ऋजवः समीचीना निर्दोषा इति ह्यनर्थान्तरम्' इति (अनुबन्धाद्यधिकरणे ३-३-५१)। निर्दोषगुणपूर्णत्वादेव हि मुक्तप्रायाः।

२५ श्लोके—'युवा=अप्रतिहतयौवनः सर्वदा एकरूपबलज्ञानादिमान्' इति मध्वमन्त्रार्थमञ्जरी। 'प्राणो वै युवा सुवासाः' इत्यैतरेयब्राह्मणम् (२-२)। "युवा 'यु मिश्रणे' कर्मणि क्विप्।। वातेः कनिन्। युश्चासौ वा च युवा विष्णुना सह गच्छतीति युवा। 'प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जद्याति' इति श्रुतेः" इति तैत्तिरीयभाष्यखण्डार्थः (२-१७)। 'युवा=नित्यतरुणः' इत्यनुव्याख्यानम्।

२७ श्लोके—'सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वाय' इति श्रीवायुगद्यम्।

३१ श्लोके—'अस्मि नित्यास्तितामानात् सर्वजीवेषु संस्थितः। अहं चासावहेयतः' इतीशावास्यभाष्यम्। तथाहि तत्र टीका—'नित्यत्वेन प्रमितत्वादित्यर्थः। अनेन 'असभुवि', 'माङ्माने' इत्येतयोरिदं रूपमित्युक्तं भवति। अहेयतोऽहेयत्वतः। न हीयत इत्यहम् इत्यर्थः' इति। तथाच तत्रैव श्रीवादिराजपूज्यचरणानां प्रकाशिका—'तथा प्रलयेऽप्यविलुप्तज्ञानवत्त्वेन अस्तित्वोपलक्षितसकलगुणवत्तया तेनैव वायुना सदा प्रमितत्वादस्मीति पदेनाप्युच्यमानं परं ब्रह्म। अहमित्युच्यमानं परं ब्रह्म। अत एव यो विष्णुस्तस्य अकारवाच्यस्य परमात्मनः वायुः निलं निलयनं सन्निधानपात्रीभूतं रूपम्' इति॥

३५ श्लोके—'अशेषदुर्मतभञ्जकेनात एव प्रभञ्जनशब्दवाच्येन' इति प्रातस्सङ्कल्पगद्यम्।

**३६ श्लोके**—'चेतिष्ठः=जीवेषु अतिशयेन चेतयिता' इति श्रीसत्यप्रमोदिनी।

**३७ श्लोके**—ई जगत्तु पञ्चभूतगळु सकलक्रियेगळु यावत्तु मन्त्रगळु मुख्यप्राणन देशेयिंदे हुट्टिदवु। अन्था मुख्यप्राणनादरो परशब्दवाच्यनाद श्रीहरियिंद हुट्टिदनु। 'प्राणो ब्राह्मणः' इति श्रुतिः।

**३९ श्लोके** –'शुचिः पावकः उच्यते' इति पावमानम्। शुचिः=असुरावेश अज्ञानादिदोषगळिंद रहितरागि केवलशुचिर्भूतरागिरुववु प्राणनु।

**४० श्लोके**—शिशुः=वत्सः। 'अयास्यः=पञ्चवृत्तिर्मुख्यःप्राणः' इति श्रीसत्यप्रमोदिनी। 'अयास्यः=उद्गाता वायुः' इति तैत्तिरीयारण्यकम् (३-५-१)। 'अयास्यः=यासः प्रयत्नः, तत्साध्यो यास्यः, न यास्योऽयास्यः। युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः' इति वेदभाष्यकारः। 'सुखरुः=सत्तत्त्वानां सुष्ठूपदेशकः' इति ऋङ्मन्त्रव्याख्या सत्यप्रमोदिनी। रुद्रः='रुजां द्रावणतो रुद्रो वायुः' इति ऋग्भाष्यम्। 'प्राणो वै रुद्रः' इति जैमिनीयब्राह्मणम् (४-२-६)। 'धारवाकः=सच्छास्त्रवागुपदेशकः' इति सत्यप्रमोदिनी।

**४१ श्लोके**—'पुरुहूतः पुरूरवाः', 'प्राण एव पुरूरवाः' इति श्रुतिः। 'पुरुहूतः पवमानः' इति पावमानम्।

**४२ श्लोके**—'सुविदत्रः=प्राण औदार्यवान' इति श्रीसत्यप्रमोदिनी।

**४३ श्लोके**—'पूर्णो वायुर्हि देवानाम्' इति श्रुतिः। ओजस्सहश्शब्दौ वायुवाचिनौ। तथाहि भागवततात्पर्यम् (२-५-२५)—'ओजस्त्वनभिभाव्यत्वात् सहश्च स्वेच्छया कृतेः। बलं विधारकत्वाच्च विधृतिर्वायुरुच्यते।' इति॥

**४५, ४६ श्लोकयोः**—'अयं वाव शिशुर्योऽयं मध्यमः प्राण इति चन्द्रिकोदाहृते वाक्ये स्थूलदेहाख्यविस्तृतप्रदेशगतलिङ्गशरीररूपगृहे विष्णुरूपायां स्थूणायाम अन्नाख्येन श्रीरूपेण दाम्ना बद्धो गोवत्सरूपो वायुर्मध्यमत्वेनोच्यते' इति भाष्यदीपिका (१-३-२४)। प्राणो वायुः शिशुः गोवत्सरूपः, सूक्ष्मशरीरमेव आधानं सूक्ष्मगृहम्, स्थूलशरीरमेव प्रत्याधानं वितानं, प्राणो हरिः स्थूणा, अन्नं

श्रीतत्त्वं दाम बन्धनरज्जुः' इति प्राञ्चः। "वायुवु गोविन करुविन स्वरूपदिंद एल्ला प्राणिगळल्लिरुत्ताने। जीवन सूक्ष्मशरीरवु वायुविगे आवासस्थानवाद सूक्ष्म-गृहवु। जीवन स्थूलशरीरवु मनेगे आश्रयभूतवाद विस्तारस्थळवु। अन्नके अभिमानियाद लक्ष्मीदेवियु वायुवेंब करुविगे कट्टतक्क हग्ग। श्रीहरियु करुवन्नु कट्टतक्क कम्ब। लोकदल्लि करुवन्नु कट्टलिक्के मनेय मध्यदल्लि चिक्क हट्टियन्नु माडि गूटवन्नु स्थापिसि हग्गदिंद करुवन्नु कट्टुत्तारे। हागेये देहदल्लि करुविन रूपदिंद सर्वप्राणिगळल्लिरतक्क वायुविगे हट्टिय स्थानीयवादुदु प्राणिगळ सूक्ष्मशरीर, गृहवादुदु स्थूलशरीर, गूटस्थानीय श्रीहरि, हग्गस्थानीय लक्ष्मीदेवि। अन्दरे— जीवन स्थूलशरीरवेंब विस्तारस्थळदल्लिरतक्क लिङ्गशरीरवेंब हट्टियल्लि नारायणनेंब गूटदल्लि लक्ष्मीयेंब हग्गदिंद करुविन रूपनाद वायुवन्नु कट्टुत्तारे। (अन्दरे वायुवु लक्ष्मीनारायणर अधीनने)। हीगे तिळिदवरु जितेन्द्रियरागि मुक्तरागुत्तारे।" इति परमपूज्या अग्रहारनारायणतन्त्रिमहानुभावाः। अन्नमिति—'अन्नं श्रीः, अन्नाभिमानिनी साक्षाच्छ्रीरेव प्रमदोत्तमा। साऽन्नमित्युच्यते' इत्युक्तेरेति बृहदारण्यकभाष्यभावबोधः (४-२)।

४७ श्लोके—'The greatness of Mukhyaprāṇa is then made known by saying that the seven gods of undiminished intelligence (akṣitayaḥ) viz. Rudra, Parjanya, Āditya, Agni, Indra, Pṛthivi and Dyaus meditate on him in the right eye of man, stationing themselves in the different areas of the eye such as Rudra in the red streaks there, Parjanya in the aqueous humour, Āditya in the pupil, Agni in the black of the eye, Indra in the white of the eye and Pṛthivi and Dyauḥ in the lower and upper eye-lashes". The Bṛhadāraṇyaka Upaniṣad, Expounded from Śrī Madhvācārya's Perspective, by Dr. B. N. K. Sharma (pages 49 and 50).

"क्षीणवागद ज्ञानमनस्सुगळुळ्ळ सदाशिव मोदलाद एळु देवतेगळु बलकण्णिनल्लिरतक्क वायुवन्नु उपासना माडुत्तारे। मोक्षदल्लि आनन्दवु अतिशय-वागुवुदक्कागि आ एळु देवतेगळिन्द सेव्यनाद वायुवु विष्णुवशनेन्दु तिळियुववनु मुक्तनागि दुःखलेशवू इल्लद नित्यवाद आनन्दवन्ने अनुभविसुत्ताने।

४८, ४९, ५०, ५१, ५२, ५३, ५४, ५५ श्लोकेषु—"सलिङ्गरादंथा मातरिश्वदेवरु जीवनस्वरूपदल्लि इद्दारेंतल्ल इल्ला एंतल्ल विप्रतिपत्ति। इल्लेइल्लवेंदु पूर्वपक्ष। हागादरे स्वरूपदल्लि वायुदेवरु इद्देआदरे रुद्रादिगळिगू अल्लि स्थिति उंटागलीयंदरे अदक्के उत्तर—ईतनर्कित अवररादरिंदल्ल सुषुप्तिकालदल्लि अवरिगे सुप्ति आगुवदरिंदल्ल अल्लि स्थिति उंटागोदिल्ला, इदल्लदे (स्वरूप, लिङ्ग, अनिरुद्ध, स्थूल) स्वरूपलिङ्गानिरुद्धस्थूल ई नाल्कु देहगळल्लि वायुदेवरु तावे व्यासरागिद्दु जागरूकरागि यंबत्तारुसाविरदनानूरु श्वासजप माडतारेंदु नाडीप्रकरणसन्धि नाल्वत्तुनाल्कने पद्यदल्लि हरिकथामृतसारकाररु हेळिरुत्तारे—"ईरेरडुदेहगळोळिद्दु समीरदेवनु श्वासजपना नूरधिकवागिप्प यंभत्तारुसाहस्र। ता रचिसुवनु दिवस वंदके मूरुविध जीवरोळगिद्दु खरारिकरुणाबलविदेंतुटो पवनरायनोळु।" यंत आतन गुण होगळिरोणदिंद जैवीयस्वरूपदेहप्रवेश उण्टेन्दु निश्चयिसितक्कद्दु। हागादरे दाव दाव प्रमाण आधारद मेले हेळुत्तीरि एन्दरे—श्रीमद्भगवत्पादर साक्षात् शिष्यराद श्रीनरहरितीर्थरु श्रीभागवततात्पर्यक्के दीपिका माडतक्कालदल्लि हेळिरो क्रम येनेंदरे—प्रमाण "जीवास्तु त्रिविधाः प्रोक्ता उत्तमाधममध्यमाः। उत्तमा देवताः प्रोक्ता ऋष्याद्या मध्यमाः स्मृताः। अधमा मानुषोत्कृष्टाः ते चापि त्रिविधाः स्मृताः। सात्त्विका राजसास्तत्र तामसादिप्रभेदतः। तेषु सर्वेषु जीवेषु देहेषु च वसत्ययम्। स्वरूपेन्द्रियदेहेषु मातरिश्वाभिधानतः। धत्ते लिङ्गशरीरस्थः सूत्रनामा महाप्रभुः। सूक्ष्मदेहगतस्सोऽपि पवमानेति चोच्यते। स्थूलदेहगतस्सोऽपि मुख्यप्राणाभिधो हि च। मध्यमाधमदेहेषु प्राणापानाभिधानतः। पूर्वोक्तिषु च सर्वेषु स्थूलदेहेन्द्रियादिषु। स्वरूपदेहबुद्ध्यादिस्थितत्त्वेन महाप्रभुः। प्रेरयत्यखिलं विश्वं जङ्गमाजङ्गमं तथा। तत्तद्देहगतप्राणस्तत्तद्देहस्थमूर्तिना। अनिरुद्धादिनाम्ना हि सर्वप्रेरकमूर्तिना" इति पवमानसंहितायाम्। मत्तु ई विषयदल्लि श्रीसर्वज्ञरायर उक्तियु इरुत्तदे। उक्तञ्च न्यायविवरणे—"इन्द्रियस्थैः स्वरूपैस्तु सुज्ञानं जनयत्यसौ। मनस्थेन विशेषेण कामैः कर्मकृदेव सः। पृथक्स्थितेन रूपेण जीवं धारयति प्रभुः। जीवस्थितेन रूपेण वेदयत्यहमित्यपि। प्राण एको वशी नित्यं बाह्यान्तःकरणेश्वरः। तान्येतान्यवशान्येव तथाऽपि कृपयैव सः। पृथक्शक्तोऽपि

4

तद्वैस्तु स्वरूपैस्तद्वकार्यकृत्। तस्यैशो भगवान् विष्णुरेवमेव यथाक्रमम्'' इति, यंब प्रमाणक्के व्याख्यान ताम्रपर्णीय—''मनस्थेन विशेषेण मनोगतेन रूपेण ज्ञानं जनयति कामैः कामगतैः कर्म करोति, पृथक्स्थितेन भगवत्सन्निधिगतेन मुख्य-प्राणेन जीवस्थितेन जीवस्वरूपान्तःकरणगतेन सर्वान् वशीकरोतीति वशीत्यर्थः। इदक्कदे श्रुतिप्रमाण— घर्मा समन्ता त्रिवृत्तं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम॥ इदरर्थ एनंदरे—स्वरूपदेहदल्लि दीप्तरादंथा व्याप्तरादंथा भगवद्रूपगळ सेवा माडोदर-कोस्कर वायुदेवरु कूडा प्रवेश माडिद्दारेन्दु ताम्रपर्णीय टिप्पणियल्लि उक्तवागिदे, तत्प्रयुक्त जैवीय स्वरूपान्तःकरणगळल्लि केशवादि कृष्णान्त रूपगळिंद श्रीहरि य्यांग इद्दानो तद्वत् रुद्रादितत्त्वेशर नामधारण माडिकोंडु वायुदेवरु स्वरूपांतःकरण-दल्लि ताविद्दु जीवर कार्य नडसुत्ता सर्वरन्नू वशमाडिकोंडु इद्दारेंबोदे सिद्धवाद प्रमेय तिळियबेकु'' इति श्रीहरिकथामृतसारभावदर्पणटीकाकाराः॥ ९—१२॥ ''जीवस्थो वायुरीश्वरः'' इति छान्दोग्यभाष्यम्। 'सकलजीवस्वरूपेन्द्रियवासी लिङ्गशरीरस्थः प्राणो मातरिश्वाभिधः' स पुरुनिष्ठः=सर्वत्रगः,—इति श्रीसत्यप्रमोदिनी। 'आदित्यः=आदित्यस्थः प्राणः' इति षट्प्रश्नोपनिषद्भाष्यटीका।

**५२ श्लोके**—पुरोगवः=अग्रगामी। 'वसिष्ठः=सर्वस्य वासयितृतमः' इति ऋग्व्याख्या (२-३३-५)। 'प्राणो वै वसिष्ठः' इति शतपथम् (८-१-१-६)। 'श्रीहरिसेवार्थं भक्त्यतिशयेन सर्वजीवस्वरूपान्तर्वासी प्राणो वसिष्ठः' इति श्रीसत्यप्रमोदिनी।

**५३ श्लोके**—'इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः' इति पावमानी ऋक् (९-५-९)। 'वृषा=सकलाभीष्टप्रदाता प्राणः' इति श्रीसत्यप्रमोदिनी। 'प्राणो वै हरिः स हि हरति' इति कौषीतकम् (१७-१)।

**५५ श्लोके**— (यस्य) नैवासुरावेशः=असुरपाप्माविद्धः। 'यो वै संवत्सरः प्रजापतिः षोडशकलोऽयमेव। सः वायुः। चन्द्रस्य स्वाधिष्ठानस्य। तथा षोडशकल इति प्रोच्यते' इति बृहद्भाष्यभावबोधः (३-६-२)। वेधाः=ऋजुः चतुर्मुखो वा।

**५७ श्लोके**—'वायुवु विष्णुविगे मगनागि चेन्नागि आनन्दवन्तु होंदुवदरिंद

संवत्सर एन्निसुत्ताने।' 'सम्यग् वत्सभूतान् रमयतीति संवत्सरः' इति भाष्यदीपिका (१-२-१०)।

**५९ श्लोके**—वायोर्बृहतीसहस्रप्रतिपाद्यत्वं द्वासप्ततिसहस्ररूपत्वञ्चैतरेयभाष्ये प्रतिपादितम् ॥

**६० श्लोके**—'सद्गुरिः=सहते सहति साहयति च परकीयमज्ञानादिकं विश्वस्य भारं वा सर्वमपाकर्तुं सोढुं वा समर्थः, भक्तापराधसहिष्णुश्च सद्गुरिरित्यर्थः' इति श्रीसत्यप्रमोदिनी। प्राणः=सद्गुरिः।

**६१ श्लोके**—'ईशानो मारुतः प्राणो वायुर्जिष्णुस्तथैव च। धृष्णुश्च पवमानश्च पवनश्चेति कथ्यते। इति शब्दतत्त्वे' इति बृहद्भाष्यम् (३-५-५)।

**६२ श्लोके**—अन्नादिना अन्नादिभावेन तदभावेन चेत्यर्थः। अतोऽमृत इति योज्यम्।

**६५ श्लोके**—'वायोः गुणाः नित्यमध्यर्द्धाः, आधिक्येन ऋद्धाः तत्तस्मादेव वायुरध्यर्द्ध इत्यर्थः' इति बृहद्भाष्यभावबोधः (५-९-१)।

**६८ श्लोके**—व्यष्टिः समष्टिः='रुद्रान्तानां सकलदेवानां जीवानाञ्च प्रतिदेहमन्तर्नेतृत्वाद् व्यष्टिः। बहिर्नेतृत्वात् समष्टिरित्यर्थः। सर्वेषां सामूह्येनेशः समष्टिः। प्रतिव्यक्ति विशिष्येशो व्यष्टिः।' इति श्रीमद्भागवतविजयध्वजीयम् (११-११-४४)। 'पञ्चभूतमनोबुद्धिरुद्राणां प्रतिदेहकम्। बाह्यतश्चापि नेतृत्वाद् वायुर्व्यष्टिः समष्टिकः।' इति प्रभञ्जने इति भागवततात्पर्यनिर्णयः (११-११-४४)। 'वायुरेव व्यष्टिः, वायुरेव समष्टिः' इति च भागवततात्पर्यनिर्णयोदाहृतवचनम्। भरतः='एष उ वा इमाः प्रजाः प्राणो भूत्वा बिभर्ति तस्माद्वेवाह भरतवदिति।' इति शतपथम् (१-५-१-८)। 'प्राणो हि भरतो नाम सर्वस्य भरणात् श्रुतः' इति भारततात्पर्यनिर्णयः (१८-१४३)।

**६९ श्लोके**—'पञ्चहोता=चक्षुरादिपञ्चेन्द्रियेषु विषयहोता' इति सूत्रार्थमणिमञ्जरी (१-१-१५)। (पुमान्=ऋजुः)। धाय्या=प्राणः, 'प्राणो वै धाय्या'

इति कौषीतकब्राह्मणम् (१५-४)। 'वायुर्धाय्या' इति जैमिनीयोपनिषद्ब्राह्मणम् (३-४-२)। 'यत्र यत्र वै देवा यज्ञस्यछिद्रं निरजानंस्तद् धाय्यानां धाय्यत्वम्' इत्यैतरेयब्राह्मणम् (३-१८)। 'त्वष्टा=वाणीपतिः' इति श्रीब्रह्मदत्ताचार्याः (जिज्ञासुरचनामञ्जरी, द्वितीयो भागः, पृष्ठ. ३६०)। प्राणः=मुख्यप्राणः, ब्रह्म=खेतरजीवापेक्षया पूर्णः, कम्=सुखम्, ब्रह्म=पूर्णम्, खम्=ज्ञानम्, ब्रह्म=पूर्णम् इत्यर्थः' इति सूत्रार्थमणिमञ्जरी (१-१-१५)। 'प्राणो हि प्रियः प्रजानाम्' इति तैत्तिरीयब्राह्मणम् (२-३-९-५)। 'अमृतं वै प्राणः' इति कौषीतकब्राह्मणम् (११-४-१४-४)।

**७० श्लोके**—'दाश्वान्=यजमानः' इति ऋग्भाष्याटीका। 'दाश्वान्=सच्छास्त्रप्रदाता' इति श्रीसत्यप्रमोदिनी। 'आशायाः=भारत्याः, प्राणः=मुख्यप्राणः, भूयान्=गुणादितः श्रेष्ठ इत्यर्थः' इति सूत्रार्थमणिमञ्जरी (१-३-८)।

**७१ श्लोके**—'एको ह्येवैष वीरो यत्प्राण एकवीरः' इति जैमिनीयोपनिषद्ब्राह्मणम् (२-५-१)। 'चतुर्दशसु चेन्द्रेषु यो द्वितीयस्तु रोचनः। स वायुरिति विख्यातः' इति गारुडम्।

**७२ श्लोके**—'प्राणं देवा अनुप्राण्यान्ति' इति श्रुतिः।

**७४ श्लोके**—पुरुष्टुतः=सुपर्णशेषरुद्राद्यैः संस्तुतः' इति श्रीसत्यप्रमोदिनी। 'तुराषाट्=अरिविजयी प्रभञ्जनो दुर्मतभञ्जकत्वात्' इति श्रीसत्यप्रमोदिनी। 'अक्रतुः=अहिंसश्रौतयज्ञवृत्तिरहंभगवन्निश्चययुक्तः। अक्रतुः=हरौ मतिमान्।

**७५ श्लोके**—विभीषणः=भगवद्द्वेषिगळाद दैत्यरिगे भयङ्करवाद हनुमद्रूपवेनु। हिङ्कारः='प्राणो हि हिङ्कारः तस्मात् अपिगृह्य नासिके न हिङ्कर्तुं शक्नोति' इति शतपथम् (१-४-१-२)। 'ब्रह्मा हिङ्कार इत्युक्तो वायुः प्राणः शरीरगः' इति च्छान्दोग्यभाष्यम् (२-१)।

**७८ श्लोके**—सर्वभूतान्तरात्मा=सर्वभूतान्तर्नियामकः।

**७९ श्लोके**—तेजिष्ठः=अत्यन्ततेजस्वी सत्यलोकेश्वरगे वाणीप्रियतमः प्राणः।

८० श्लोके—पुरुरूपः=अनेकरूपवान्।

८२ श्लोके—'यदि मे सहसाऽऽकृष्टे इत्यत्र मे मया यदि सहसा सत्वेन आकृष्टे तर्हि शिले इव समे सत्यौ याताम् आयाताम्, द्यावापृथिव्यौ सत्वेनाकृष्य शिलाद्वयवत् सङ्घट्टयामित्यर्थः' इति लक्षालङ्कारः (उद्योगपर्वणि ७९ अध्याये)।

८३ श्लोके—'पुरुभोजः=सर्वेषां सात्विकानां पोषकः।' इति ऋग्व्याख्या।

८४ श्लोके—'अनाद्यनन्तकालेऽपि काम्येन हरिपूजनम्। यतो नास्ति ह्यतो वायुः ऋजुयोगः प्रकीर्तितः।' इति गारुडब्रह्मकाण्डम् (१६-१५)। 'जीवघनः=सकलजीवोत्तमः' इति षट्प्रश्नभाष्यटीका (५:२)। 'तस्मात् प्राणः सर्वजीवाधिकोऽभूत्' इति हि शास्त्रम्।

८५ श्लोके—'विद्वान् मध्वः' इति श्रुतिः। 'नाराः=मुक्ताः, तेषाम् अयनम्=आश्रयः, नारायणः=श्रीवायुः' इति ताम्रपर्णीयम्।

८६ श्लोके—विश्वशम्भुः=विश्वस्य सुखप्रदो वायुः।

८७ श्लोके—ब्रह्मणस्पतिः='एष उ ब्रह्मणस्पतिर्वाग् वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः' इति बृहदारण्यकम् (३-३-२१)। वेदाभिमानियाद भारतीदेविगे पति एंदर्थ। उद्गीथः='एष उ वा उद्गीथः। प्राणो वा उत् प्राणेन हीदं सर्वमुत्तब्धम्। वागेव गी थोच्च गीथा चेति स उद्गीथः' इति शतपथम् (१४-४-१-२५)। क्षत्रम्='प्राणो वै क्षत्रम्' इति बृहदारण्यकम् (७-१३-४)। 'प्राणो वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः' इति शतपथम् (१४-८-१४-४)। 'तरुः=लोकत्रयतारकः'॥ 'आकाशः=आकाशमानी विशेषेण लक्ष्म्याविष्टतया आकाश इत्युक्तो मुख्यवायुः।' इति छान्दोग्यखण्डार्थः (५-२३-२)। 'त्वमुक्थमसि। उक्थं प्राणः' इति श्रुतिः। 'उत्थापनादुक्थनामा मोक्षे प्राप्यो यतोऽखिलैः' इति बृहद्भाष्यम् (७-१३-१)। उक्थम्=श्रेष्ठः। संवर्गः='वायुर्वाव संवर्गः' इति च्छान्दोग्यम् (४-३-१)। मुख्यवायुदेवरे संहारकरादुदरिंद संवर्गरेनिसुत्तारे। सोमः=सोमवंशजः। 'स सोमः सोमवंशजः' इति फलसौरभम् (५०८ श्लोकः)।

'सोमो वै पवमानः' इति शतपथम् (२-२-३-२२)। सर्वायुषम्='प्राणो हि भूतानामायुः। तस्मात् सर्वायुषमुच्यते' इति तैत्तिरीयोपनिषत् (२-७)।

८८ श्लोके—'प्राणो दीक्षा' इति तैत्तिरीयब्राह्मणम् (३-८-१०-२)। आङ्गिरसः='सोऽयास्य आङ्गिरसोऽङ्गानां हि रसः प्राणः' इति बृहदारण्यकम् (३-३-१८)। अयास्यरेनिसिकोण्डिरुव मुख्यप्राणनु एल्ला अङ्गगळिगू रसरूपनाद्दरिंद आङ्गिरस एनिसिकोंडिरुव मुख्यप्राणनु एंदर्थ।

८९ श्लोके—अप्रधानवाद अग्निय नेतारनु करचरणाद्यवयवगळल्लि हृदयस्थितवाद अग्निशिखागळन्नु नयनमाडुवनु अंदरे होन्दिसुवनु, आ कारणदिंदले प्राणाग्नि एंदु करेयल्पडुववनु आद आ वायुदेवने अग्निस्थितवाद शुद्धस्वरूपद पवमाननु एंदर्थ।

९० श्लोके—सुवीरः पवमानः, व्रतभृत् पवमानः। 'वृत्रहा=पापसमूहस्य दुरितराशेर्वा निहन्ता' इति श्रीसत्यप्रमोदिनी। 'वृत्रन्तमः' इति च ऋग्भाष्यम्। अज्ञानविनाशक इति यावत्। दस्युहा=यथार्थज्ञानोपक्षयहेतोरज्ञानस्य हन्ता, मिथ्यात्ववादिमहातस्करान् गूढद्वेषिणोऽन्तङ्गमयिता।

९१ श्लोके—स्वयम्भूः=स्वयं विष्णुः तस्माद् भवति जायत इति मुख्यप्राणः। 'मुख्यप्राणस्तदुद्भवः' इत्यणुभाष्यम्। अभिभूत्योजाः=अभिभूतिर्दण्डोऽपहारश्च, ओजः उज सामर्थ्ये इति नैरुक्तो धातुः तस्मादसुन्, अवष्टम्भकसामर्थ्यं सुमहद्बलम्, अभिभूतिकारि ओजो यस्य स इति मध्यमपदलोपिबहुव्रीहिः, असतो दुर्मार्गवर्तिनो दण्डयति तत्सामर्थ्यमपहरतीतितथोक्तः, महौजा इत्यर्थः। क्षेपिष्ठस्त्वं क्षिपको वायुः। यत्तैत्तिरीयाः—'वायुर्वै क्षेपिष्ठा देवता' इति। शुक्रशोचिः पवमानः। शुचिव्रतः पवमानः। विज्ञातवीर्यो वायुः।

९२ श्लोके—'अमर्त्यः=अविलुप्तज्ञानः' (वायुः) इति ऐतरेयखण्डार्थः (१-१-८)। अकृत्तरुक्=परकृतच्छेदभङ्गहिंसादिशून्यः। वेदिषद्='वेदिं यज्ञवेदिं, वेदिनो ज्ञानिनो देवान् ऋषीन् वा स्यन्ति नाशयन्तीति वेदिषाः राक्षसाः, तान् द्यति खण्डयतीति वेदिषद् वायुः' इति मध्वमन्त्रार्थमञ्जरी। भामः=अपरिमितज्ञान-

भासुरस्वरूपः कान्तिमान् सुन्दरस्तेजस्वी। एकजः=मूलतो वायुरेक एव जायत इत्येकजः। पुरूरवाः='प्राण एव हि पुरूरवाः' इति श्रुतिः। 'पुरूरवा वायुरेवोरुशब्दात्' इति ऋग्भाष्यम्। बहूनां सच्छास्त्राणां व्याख्याता तद्व्याख्येयश्च पुरूरवाः। 'विश्वधायः=श्रीशाज्ञया ब्रह्माण्डस्य स्रष्टा धर्त्ता पोष्टा च सूत्रनामको वायुः' इति श्रीसत्यप्रमोदिनी।

**९३ श्लोके**—वेदः=सर्वं जानानो वायुः सर्वज्ञः। पाजः=द्यावापृथिवीस्थ-सर्वजगच्चेष्टकत्वपालकत्वादिमहासामर्थ्यरूपं पाजो यस्यास्ति सः। पाजस्तेजः। वशी=वशोऽधीनः सर्वोऽस्यास्तीति वशी मतुबर्थिक इनिः। वज्री=धर्मवज्रदण्डधरो वायुः। 'वज्री वृषभो भीमः' इति पावमानम्। वज्रदेहवान् वज्रायुधो वा। सहावान्=सहस्शब्दस्य सलोपो दीर्घश्च सहोरूपः अक्लिष्टकर्मा अखण्डशक्तिः प्राणः, मार्गशीर्षमासे हनुमत्त्वेन भीमत्त्वेन चावतीर्णो वायुः। 'अनवब्रवः=श्रीहरेरनन्तकल्याणगुणाकरत्वसर्वोत्तमत्वपञ्चभेदजीवादिगततारतम्यजगत्सत्यत्वादि-सनातनशाश्वतसत्सिद्धान्ततत्त्वोपदेशकः' इति श्रीसत्यप्रमोदिनी। विजेषकृत्=जेषृ प्रयत्ने गतौ घञ्' विशिष्टाकुण्ठितप्रयत्नकृत् महाध्यवसायी निर्विघ्नश्च। सर्ववीरो वायुः। ज्योतिष्मान् पावकः प्राणः।

**९४ श्लोके**—'व्रात्यः=व्रतनिष्ठः' इति षट्प्रश्नखण्डार्थः (२-६)। अभिमातिषाहः=अभिमातीन् अभिमानिनः परान् हिंसकान् शत्रून् तुरान् सहन्ते निराकुर्वन्ति 'छन्दसि सहः' इति ण्विः, एकत्वे भूमा, 'पराक्रमगौरवाद् बहुरूप-त्वाच्च' इति श्रीसत्यप्रमोदिनी। पुरुचेतनो जीवोत्तमः। आघृणिः प्राणः, आसमन्ताद् घृणिर्यस्य स तथोक्तः, शत्रूणां तापदः (ऋक् ६-५३-३)। पृथुपाजः=विपुलतेजसा संयुक्त आघृणिरिति वा वायुः।

**९५ श्लोके**—'सत्योवायुरुदाहृतः' इत्यैतरेयभाष्यम् (२-२-३)। संसार-बाधितैः प्राप्यो बाध्वो वायुरुदाहृतः' इत्यैतरेयभाष्यम् (३-२-३)। 'महाराजो वायुः' इति बृहद्भाष्यम् (४-१-१९)। 'क्षत्रजात्यभिमानी तु पवन इत्युक्ते-र्महाराजो वायुः' इति बृहद्भाष्यभावबोधः (४-१-१९)। 'आधारः सर्ववेदानां वेदाणी प्राण उच्यते' इत्यैतरेयभाष्यम् (२-७-१)।

९६ श्लोके—'महाचमसनामाऽसौ यस्मादतिचमत्कृतिः। माहाचमस्यस्त-ज्ज्ञानी ब्रह्मा सम्परिकीर्तितः' इति तैत्तिरीयभाष्यम् (१-१३)। महाचमसविद्याधि-कारी प्राणः॥ 'प्राणो गायत्री' इति शतपथम् (६-४-२-५)।

९७ श्लोके—महायोगेश्वरेशेशः='महायोगा देवाः, तेषामीश्वर इन्द्रः, तस्यापीशा गरुडशेषरुद्राः, तेषामपीशो ब्रह्मा वायुर्वा' इति श्रीविजयध्वजीयम् (११-२०-८)। जातवेदाः=जातस्य सर्वस्य वेदिता जातवेदा मुख्यप्राणः, 'प्राणो वै जातवेदाः, स हि जातानां वेद' इत्यैतरेयब्राह्मणम् (२-३९)। 'प्राणो वै तनूनपात् स हि तन्वः पाति' इत्यैतरेयब्राह्मणम् (२-४)। 'योऽयमनिरुक्तः प्राणः स सुरूपकृत्नुः' इति कौषीतकब्राह्मणम् (१६-४)। अध्वर्युः प्राणः। 'प्राणस्तेन पृथग्वर्त्मा वायुर्ज्ञानायुरूपतः' इति च्छान्दोग्यभाष्यम् (५-११-२)।

९८ श्लोके—'वायुर्वै नभसस्पतिः' इति गोपथम् (२-४-९)। 'प्राण उद्गाता' इति कौषीतकम् (१७-७)। 'अयं वै पूषा योऽयं पवते एष हीदं सर्वं पुष्यति' इति शतपथम् (१४-२-१-२९)। 'प्राणो माध्यन्दिनः पवमानः' इति शतपथम् (१४-३-१-२९)। "स्वरः=स्वातन्त्र्यात् स्वः विष्णुः, तद्रतेः स्वरः वायुः' इति छान्दोग्यखण्डार्थः (१-४-१)। 'प्राणः स्वरः' इति ताण्ड्यब्राह्मणम् (७-१-१०)। 'अहन्तव्यत्वतस्त्वघ्न्यं वायुं वृषभरूपिणम्' इति ऋग्भाष्यम्। 'हिरण्यगर्भः कः प्रोक्तः' इति गीताभाष्यम् (२-५५)। 'कः=वायुरूपः' इति लक्षालङ्कारः (उद्योगपर्वणि ४५)। हिरण्यगर्भः प्राणः। प्राणाग्निः=प्राणः। 'प्राणाग्नेः सूक्तमुत्तमम्' इत्याचार्याः। 'वायुर्वै स्तोता' इति तैत्तिरीयब्राह्मणम् (३-९-४४)। "तेजो वै वायुः' इति तैत्तिरीयब्राह्मणम् (३-२-९)।

९९ श्लोके—मुख्यः=मुख्यप्राणः। 'स मुख्यो मुख्यप्राणः' इति श्रुतिः।

१०० श्लोके—वायुर्वैवसुरन्तरिक्षसत्' इति शतपथम् (६-७-३-११)। 'वायुर्वै होता' इत्यैतरेयब्राह्मणम् (६-८-१४)। 'प्रजापतिर्वै विश्वकर्मा' इति शतपथम् (७-४-२-५)। 'वायुर्वात्र पुरोहितः' इति ऐतरेयब्राह्मणम् (८-२७)।

'अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः' इति ऋक् (९-६६-२०)। 'वायुर्वाव उग्रः' इति शतपथम् (६-१-३-१३)। वैश्वानरो वायुः। वायुर्वै यज्ञः। 'एष वै पृथग्वर्त्मा वैश्वानरः यद्वायुः' इति शतपथम् (१०-६-१-७)। अयं वै यमो योऽयं वायुः पवते' इति शतपथम् (१४-२-२-११)। जैत्रो वायुः। 'चित्रं जैत्र!' इति युक्तिमल्लिका। (३)।

**१०१ श्लोके**—'पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते' इति गोपथम् (१-३९)। 'त्रैष्टुभो हि वायुः' इति शतपथम् (८-७-३-१२)। 'विश्वो वायुः समुद्दिष्टः' इति बृहद्भाष्यम्। 'वायुर्वै वषट्कारः' इति शतपथम् (४-२-१-२९)। 'वायुरनुवत्सरः' इति ताण्ड्यम् (१७-३-१७)। 'द्युतानो मारुतः' इति ताण्ड्यम् (१७-१-७)। 'प्राणो वै सविता' इत्यैतरेयब्राह्मणम् (३-१९)। 'वायुः सप्तिः' इति तैत्तिरीयब्राह्मणम् (१-३-६-४)। 'अयमेव स्रुवो योऽयं पवते' इति शतपथम् (१-३-२-५)। 'प्राणो वै मित्रः' इति शतपथम् (६-५-१-५)।

**१०२ श्लोके**—'अयं वै साधुः योऽयं पवत हीमान् लोकान् सिद्धोऽनुपवते' इति शतपथम् (१४-१-२-२३)। 'वायुर्वा आशुस्त्रिवृत् स एष त्रिषु लोकेषु वर्त्तते' इति शतपथम् (८-४-१-९)। 'त्रिवृत्=त्रैलोक्याचार्यः' इति प्राञ्चः। तार्क्ष्यः='वायुर्वै तार्क्ष्यः' इति कौषीतकम् (३०-५)। 'अयं वै तार्क्ष्यो योऽयं पवते एष सर्वस्य लोकस्याभिवोढा' इत्यैतरेयब्राह्मणम् (४-२०)। तार्क्ष्यः=सर्वलोकस्याभिवोढा। ज्येष्ठः श्रेष्ठः प्रजापतिरिति श्रुतिः। 'वायुरेकपात् तस्याकाशं पादः' इति गोपथम् (१-२-८)। 'अयं वै सरिरः योऽयं पवते। एतस्माद् वै सरिरात् सर्वे देवाः सर्वाणि भूतानि सहेरते' इति शतपथम् (१४-२-२-३)। 'प्राणो वातः' इति शतपथम् (१-१-२-१४)। 'अनिरुक्तो हि वायुः' इति शतपथम् (८-७-३-१२)। 'अनिरुक्तः=साकल्येन निर्वचनागोचरः' इति भाष्यदीपिका (१-१-१७)।

**१०३ श्लोके**—'अज्ञानाभिभवास्पृष्टौ वायुर्नारायणश्च तौ' इत्यैतरेयभाष्यम् (२-२-२)। 'प्राणः सम्राट्' इति तैत्तिरीयब्राह्मणम्। 'सत्यं ब्रह्म हृदये धारयतीति सत्यधर्मा' इतीशावास्यभाष्यम् (१७)।

**१०४ श्लोके**—कुनन्नमा=‘कुत्सितकल्यादीन् विशेषेण नमयत्यधःपातयति अन्धे तमसि मज्जयतीति कुनन्नमा वायुः’ इति महाभारततात्पर्यनिर्णयभावप्रकाशिका (१०-१५)। ‘छन्दोमयः=मीयन्तेऽनेन च्छन्दांसि प्राणश्छन्दोमयः स्मृतः’ इति भागवततात्पर्यम् (११-२१-४१)। गिरिः=‘कालकूटनिगिरणाद् दैत्याख्यपाप-निगिरणाच्च गिरिः मुख्यप्राणः’ इति श्रीविजयध्वजीयम् (४-२-२४)। केशी=वायुः। ‘प्रशस्तकेशवान् सुखरूपनारायणाख्येशवांश्च’ इति निर्णयभावप्रकाशिका (१०-१५)। ‘महाबुद्धिस्तु वेदेषु पश्येद् ब्रह्मैव केवलम्’ इति भागवततात्पर्य-निर्णयः (५-११-३)।

**१०५ श्लोके**—बृहस्पतिः=वागभिमानिन्या भारत्याः पतिः।

**१०६ श्लोके**—‘स एनान् ब्रह्म गमयति’ इति श्रुतिः। ‘वायुरेव ब्रह्म गमयति, तस्य ह्येषा शक्तिः। न ह्यन्यो ब्रह्म गमयति प्रियो ह्येनद्गमयति। न ह्यन्यः प्रियो ब्रह्मणः’ इति श्रुतेरिति न्यायविवरणम् (४-३-५)। प्राणं प्राप्य परं देवास्तदन्ये चैव तद्गताः। प्राप्नुवन्ति परं देवं वसन्ति च यथासुखम्।’ इति च न्यायविवरणम् (२-४-११)।

**१०७ श्लोके**—‘उपनिषदभिमानिनी रमा हनुमदवतारे स्वोपकारकं स्वज्येष्ठ-पुत्रं मानयन्ती’ इति ईशावास्यभाष्यटीकप्रकाशिकाकाराः श्रीभाविसमीराः (१७)। त्वमेव प्रत्यक्षं ब्रह्मासीति श्रुतिः।

**१०८ श्लोके**—कविः=प्राज्ञः। ‘वायुर्वै यन्ता’ वायुना हीदं यतमन्तरिक्षं न समृच्छति’ इत्यैतरेयब्राह्मणम् (२-४१)।

**१०९ श्लोके**—अजः=प्राणः। अकारवाच्याद्विष्णोः प्राणाज्जातः इत्यजः। ‘प्राणाद्वायुरजायत’ इति श्रुतिः। ‘जालाजालं मातरिश्वानमेकम्’ इति श्रीगीता-भाष्यम् (१५-१६)। तथाच तत्रैव प्रमेयदीपिका—‘क्षरान्तर्भूतोऽपि मातरिश्वा विवक्षाविशेषेणाक्षरोऽपि भवतीत्युच्यते। जालेति—जालं संसारबन्धः, सोऽस्या-स्तीति जालः, अर्श आदिभ्योऽच्। तद्रहितश्चाजालः, अभिमानाभावात्’ इति।

११० श्लोके—उक्थ्यः=बृहतीसहस्रमन्त्रशस्त्रैः प्रतिपाद्यः । आधारपो वायुः । योगो वायुः ।

१११ श्लोके—'अमूर्तप्रतिमा=Vayu and Sri are Amūrta Pratimas of the Supreme God; (अमूर्तप्रतिमा वायुः) । महामतिः=ऋजुः । 'न केवलं सूर्यस्य तापकत्वं प्राणाधीनम्, किन्तु ज्योतिषां ग्रहाणां पतित्वञ्च ' इति षट्प्रश्नखण्डार्थः (२-६) । (अत एव ज्योतिषाम्पतिर्वायुः) ।

११२ श्लोके—'सर्वजीवनिकायेषु ब्रह्मवायू हरेर्विदौ ' इति भागवततात्पर्यम् (२-६-३५) । 'वृषभः=श्रेष्ठः ' इति सुरोत्तमीयम् । 'वायुर्वृषभरूपः सन् ' इति च्छान्दोग्यभाष्यम् (४-४-५) । 'वायुं वृषभरूपिणम्' इति ऋग्भाष्यम् (१-३७-५) ।

११३ श्लोके—'प्राण एव हरेर्बन्धुः ' इति युक्तिमल्लिका (५-६७६) ।

११४ श्लोके—नभस्वान् = मुख्यप्राणः । अणुः, महान् = ' स वा एष प्राणोऽणुर्महान् नामाऽन्तर्वा अणुर्बहिर्महान् इति कौण्डिन्यश्रुतिः ' इति सूत्रभाष्यम् (२-४-१४) । 'विश्वम्भरो वायुः ' इति बृहद्भाष्यम् (३-५-१) ।

११४, ११५, ११६, ११७ श्लोकेषु—प्रसेनानीः प्राणः । उत् सत्= 'प्राणो वा उद् इति श्रुतिः, 'सदिति प्राण इति श्रुतेः ' इति भागवततात्पर्यम् (२-६-४४) । असमो वायुः । 'प्राण, प्रधान, सूत्र, महत्तत्त्वाभिनि ब्रह्म, चित्ताभिमानि, वायु, बलाभिमानि, धैर्याभिमानि, स्थित्यभिमानि, योगाभिमानि, वैराग्याभिमानि, ज्ञानाभिमानि, प्रज्ञा, स्मृति, सुख, मेधा, मुक्ति, विष्णुभक्ति, वृकोदर, आदिगोप=जगदाधार, महाप्रभु, ऋजुः, समानः, नित्यसमः, विज्ञाता, महाध्याता, महागुरुः, हनूमान्, भीम, आनन्द मोदलाद बहुरूपगळुळ्ळवरु ' इति बृहद्भाष्यव्याख्या (३-५-४) । 'भूरिजन्मा=हनुमद्भीममध्वाख्यावतारत्रयवान् ' इति मध्वमन्त्रार्थमञ्जरी । 'भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृतिः स्मृतिः । योगः प्राणो बलं चैव वृकोदर इति स्मृतः । एतद्दशात्मको वायुः ' इति भारततात्पर्य-निर्णयः (२-१३४) । स्पष्टश्चैतद् गारुडे ब्रह्मकाण्डे षोडशाध्याये ।

११८ श्लोके—'शब्दब्रह्मात्मको ब्रह्मा सर्वशब्दाभिधो यतः' इति भागवततात्पर्यम् (३-१३-४७)। तथाच—तत्रैव दीपिका—'शब्दब्रह्मात्मकः' इति। अत्र वायोः सर्वशब्दवाच्यत्वं सङ्कोचेन व्याख्यातम्' इति। 'तत्पुरुषो मानवः' इति श्रुतिः।

१२० श्लोके—मध्यमः='न चेशवशत्वसाम्यान्मुख्यप्राणस्याप्यन्यसाम्यम्, 'यदस्मिन्निदं सर्वमध्यार्प्पोत्, प्राणस्यैतद्वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्' इत्यादिश्रुतेरीशसाम्यस्यापि भावात्। 'प्राणस्यैतद्वशे सर्वं प्राणः परवशे स्थितः' इति श्रुतेर्मध्यमत्वोपपत्तेः।' इति न्यायविवरणम् (२-४-११)।

१२१ श्लोके—'अभीष्टफलदानत्वादिन्दुः' इति युक्तिमल्लिका (५-५७५)। 'इन्द्रः प्राणः' इति शतपथम् (१२-९-४-१४)। तुरो योगी प्रचेताः प्रभृतयो वायुवाचिनः। 'प्रणवः=प्रणवाख्यो वायुः'। पुरोगवः=अग्रगामी अग्रियः। 'प्राणो वै ग्रहः' इति बृहदारण्यकम् (५-२-२)। 'वायुर्विवस्वान् विविधेषु वासात्' इति ऋग्भाष्यम् (१-३१-३)। 'वायुर्वै मध्यमा विश्वज्योतिः' इति शतपथम् (८-३-२-१)।

१२२ श्लोके—'ओमित्येव वहन्नित्यं वायुरोंवाडितीरितः' इति च्छान्दोग्यभाष्यम् (८-६-५)। 'ओमिति वाहा—ओमिति नाम हरिवाहकेन वायुना उद्वामीयते भद्रीक्रियते' इति च्छान्दोग्यखण्डार्थः (८-६-५)। ज्योतीरथः='ज्योतीरूपस्य रामस्य रथो वाहनरूपो हनूमान्। ज्योतिश्शब्दश्च रामे श्रुतौ प्रसिद्धः। तथाच ऋङ्मन्त्रः—आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि। महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि। (ऋक् १०-१०७-१)' इति मध्वमन्त्रार्थमञ्जरी। 'वायुः श्वा सन् श्वरूपैः रुद्रादिभिः इतः युतः श्वेतः प्रादुर्बभूव' इति च्छान्दोग्यखण्डार्थः (१-१२-१)। 'श्वरूपो वायुः श्वरूपरुद्रादीनुवाच' इति तत्रैव श्रीराघवेन्द्रतीर्थाः। अन्नपतिः=वायुः। 'वायुः पशुरासीत्' इति शुक्लयजुर्वेदश्रुतिः (१३-१०)। 'क्षेत्रवित्तु हरिः, प्राणः साक्षी' इति भागवततात्पर्यम् (५-११-७)। 'प्राणो ह वा पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा

प्राण आचार्यः प्राणो ब्राह्मणः ' इति च्छान्दोग्यम् (७-१५-१) । 'Mukhya-prana is present in the father, in the mother, in the brother, in the sister, in the preceptor and in the Knower of Brahman' (Chandogyopanishad, English translation by Professor K. T. Pandurangi (Page 313). भर्गः=भरति श्वासरूपेण जगद् बिभर्ति ' स एनान् ब्रह्म गमयतीति श्रुतेः परं ब्रह्म गमयति चेति भर्गशब्दवाच्यम् ' अदिभूभ्यां डुतज् ' इत्यादाविव धातुद्वयादौणादिकोऽसुन् प्रत्ययः ' इति महाभारततात्पर्यनिर्णय-भावप्रकाशिका (२-१५६)। प्राणो भ्राता, प्राणः स्वसा ।

**१२३ श्लोके**—' महान् प्राणमुख्योऽत्रतान्माम् ' इति प्रमेयनवमालिका । सप्तस्वसॄणां भ्राता=

' जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥

(ऋक् १-६५-४)

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥

(ऋक् १-६५-५)

अनयोरर्थस्तु—जामिः—सुखप्रापको बन्धुः, सिन्धूनाम्=सकलनदीनदाभिमानि-देवतानां, समुद्रदेवतादीनां वरुणादीनाञ्च, भ्रातेव स्वस्राम्=स्वस्राम् स्वसॄणाम् सप्तस्वसॄणाम् (ऋगाद्याः सप्तविद्याः स्वतन्त्रेशसृतत्वतः । स्वसॄः स्वतः पूर्वजा वा परमात्ममुखाम्बुजात् ॥ ' इति युक्तिमल्लिकाफलसौरभम् ७४७) तासां भ्रातेव=श्रीमध्व इव, (असमसमत्वेन प्रमितत्वात्) इभ्यान् न=इभ्या इव, (प्रथमार्थे द्वितीया) ये इभान् हस्तिनो नियन्तुमर्हन्ति ते इभ्याः, वादीभमृगराजाः समस्त-जगदीश्वराः, अथवा इभ्या आढ्या ईश्वरा ऋजवस्त इव, राजा=वादिराजः (नामैक-देशे नामग्रहणम्, ' पदेषु पदैकदेशान्—देवदत्तो दत्तः, सत्यभामा भामा ' इति

यथा, (महाभाष्यम् १-१-४५)। लातव्यो वादिराजः। 'लातव्यो गोत्रः' इति गोपथब्राह्मणम् (१-१-२५)। अस्यार्थस्तु—गोत्रः गुङ् शब्दे गूङ् शब्दे च, गूयते शब्द्यते इति गोत्रः, कर्मणि ष्ट्रन्, गुङ् शब्दे गूङ् शब्दे च गूयते शब्द्यते अनेन इति गोत्रः करणे ष्ट्रन्, उभयत्रौणादिकः ष्ट्रन् (४-१५७) वाद इत्यर्थः। उद्यत इति वादः, उद्यते अनेन इति च वादः। वदेः कर्मणि करणे च घञ्। गोत्रोऽस्यास्तीति गोत्रः, मत्वर्थीयोऽकारः, वादी इति भावः, वादोऽस्यास्तीति वादी मत्वर्थीय इनिः, गोत्रः, ततः गोत्रो वादीत्यनर्थान्तरम्। गां त्रायत इति गोत्रो राजा, त्रैङ् पालन इत्यस्माद् धातोः आतोऽनुपसर्गे कः, प्रयोजनवशाद् गोत्रशब्दः तन्त्रेणोच्यते, तेन गोत्रो वादी गोत्रो राजा चेति लभ्यते। वादी चासौ राजा चेति वादिराजः। अयञ्चार्थो गोत्रशब्दस्य स्वारसिकः प्रामाणिकश्चार्थ इति ज्ञेयम्। लातव्यो गोत्रः=लातव्यो वादिराजः इति देवगुह्यस्य ब्राह्मणवाक्यस्य खण्डस्यार्थः। 'नित्यं ब्राह्मणसम्बन्धि' (श्रीस्वाप्नवृन्दावनाख्यानम् १६-३६) इत्यत्र स्थितस्य 'ब्राह्मणसम्बन्धि' इति शब्देन सङ्केतितस्य गोपथब्राह्मणस्य 'लातव्यो गोत्रः' इत्यस्य वाक्यखण्डस्य विवरणम्)। सञ्जर्भुराण इत्यादिमन्त्रैः प्रतिपाद्यो वादिराजः, (लातव्यो गोत्रः, लातव्यो वादी लातव्यो राजा चेति प्रसिद्धम्)। सञ्जर्भुराणमन्त्रस्तु—

'सञ्जर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः।
धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे॥

(ऋक् ५-४४-५)

(अस्यार्थस्तु—ऋजुगाथ=ऋजुत्वेन गाथा यस्य सः तत्सम्बुद्धिः, हे लातव्य! श्रीवादिराज!, धारवाकेषु=सच्छास्त्रवागुपदेशकेषु, त्वमपि सुस्वरुः=सत्तत्त्वानां सुष्ठूपदेशकः, सञ्जर्भुराणः=सत्तत्वं सम्यग् धारयन् पालयन्, तरुभिः=लोकत्रयतारकैः ऋजुगणस्थैर्मध्वादिभिः सह, पत्नीः=(तृतीयार्थे सुः) तत्पत्न्यादिभिर्भारत्यादिभिश्च, सुतेगृभम्=सृष्टिसमकाले ज्ञातं व्यक्तम्, वयाकिनम्=सर्वव्यापिनं विष्णुरूपं हयग्रीवं, चित्तगर्भासु=हृद्गुहासु (चिन्तयन्), अभि=सर्वतः,

आभिमुख्ये, शोभसे=राजसे, तथाच, अध्वरे=वाग्रूपयज्ञे तैः ऋजुगणस्थैः सह त्वं जीवः=जीवोत्तमः, वर्धस्व=एधस्व जयेत्यर्थः।) वनानि=श्रीहरिकृपया ज्ञानरश्मीन् ज्ञानतन्तून् वैराग्यप्रवृत्तीः, अत्ति=स्वीकरोति, पुनः यत्=यः (लिङ्गव्यत्ययः) वातजूतः=ऋजुत्वाद् वायुरिव वेगं प्राप्तः, वना=वनानि, दुर्वादाख्यजङ्गलानि, वि= विविधार्थे, (भिन्दन्), अस्थात्=तिष्ठति, अग्निः=प्रसिद्धः पावकः पवमानपदवाच्यः स एव ऋजुः श्रीवादिराजो महामतिः, ह=किल नूनं वा, दाति=छिनत्ति, रोमा= रोमाण्योषध्यादीनि यथा, पृथिव्याः=भूमेः (पुनः स एव), अप्सु श्वसिति=पुनः स एव लातव्यो वादिराजः अण्डोदके (अप्सु=अण्डोदके इति बृहद्भाष्यम्) स्थित्वा श्रीहयग्रीवाज्ञया जीवेषु श्वासोच्छ्वासं प्रवर्तयति, तथाहि श्रुतिः—'अप्सु राजा विभाति' इति यजुर्वेदसंहिता(१२-२२)। अप्सु=अण्डोदके, राजा=वादिराजः, विभातीत्यर्थः। (करोम्यहरहः कर्म हंसो हंसरहस्यकृत्' इति श्रीस्वाप्नवृन्दावनाख्यानम् ९-'९४) तथाहि समाख्याश्रुतिः 'अग्रेजो राजाप्यः' इति। हंसो न=हंसरूपी नारायण इव हंसरूपी वायुरिव च सन् हंसरूपः सन् ('अतो ब्रह्मपदे योग्या जीवा हंसाः प्रकीर्तिताः' इति भागवततात्पर्यनिर्णयः (१०-९४-४०)।) हंसरहस्यकृद् वादिराजः, सीदन्=गच्छन् आगच्छन् निमज्जन् उन्मज्जन्, क्रत्वा= क्रतुना प्रज्ञया स्वकीयेन कर्मणा वा, चेतिष्ठः=अतिशयेन जीवेषु चेतयिताचेष्टानाम्, विशाम्=प्रजानां प्रजासु जीवेषु वा स्थित्वा, उषर्भुत्=श्रीशकृपया सूर्यमण्डलगः सन् उषसि सर्वान् बोधयति यः सः (अत्रोषरुपपदात् बुधधातोः क्विप्, बशो भष् इति च भत्वम्) सोमः न=पुनः पवमान इव सन्, वेधाः=ऋजुः, अयं सर्वज्ञो भाविवायुः श्रीवादिराजः पोषकत्वेन सन्, ऋतप्रजातः=सत्सिद्धान्तस्थापनाकार्यकारणादुत्पद्य भाविवायुत्वेन प्रसिद्धः सन्, पशुः न=सर्वज्ञो वायुः श्रीमध्व इव, 'वायुः पशुरासीत्' इति श्रुतिः। (सर्वानविशेषेण पश्यतीति पशुः, पश्यति जानाति सर्वम् इतीति वा पशुः) शिश्वा=शिशुना गोवत्सरूपेण वायुना सह सर्वप्राणिषु संस्थितः सन्, विभुः=सर्वत्र च विनिविष्टः सन्, दूरेभाः=दूरदेशे सर्वत्र लोकेषु च भाः दीप्तयो यस्य सः, तादृशो हंसरहस्यकृत् हंसरूपी हंसवाहनो लातव्यो वादिराजो जीवोत्तमो (मुख्यप्राणेन सत्त्रा) जीवेषु स्थित्वा (अण्डोदके च

स्थित्वा) श्वासोच्छ्वासं प्रवर्त्तयतीति ऋङ्मन्त्रयोरर्थः। निरवकाशश्रुती एते। अनेन 'सम्पूर्णानन्दभाग् गोत्रो हंसो हंसरहस्यकृत्' १३२ श्लोकोऽपि व्याख्यातः। 'सम्पूर्णोपासनाद् ब्रह्म सम्पूर्णानन्दभाग् भवेत्' इति सूत्रभाष्यम् (३-३-११)।

**१३३ श्लोके**—बह्वीः समा इति श्रुतिस्तु—

'बह्वीः समा अकरमन्तरस्मिन्निन्द्रं वृणानः पितरं जहामि।
अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन्॥

(ऋक् १०-१२४-४)

अस्यार्थस्तु स्पाष्ट्याय कर्णाटकभाषयातन्यते—अस्मिन् अन्तः=ऋजुगणस्थनाद मत्तु महामतियाद नानु ३२ लक्षणगळुळ्ळ ई देहदल्लि, अथवा वृन्दावनदल्लि, बह्वीः समाः=बहुवर्षगळु, अकरम्=सात्विकजनरन्नुद्धरिसुत्ता कालयापन माडुत्ता इद्देने (कालव्यत्ययः) अष्टल्लदे, इन्द्रं पितरं वृणानः=यारिगादरे नानु विशिष्ट-प्रतिमनो अन्था ऐश्वर्ययुक्तनाद श्रीहयाननन्नु पितृत्वेन होंदुत्ता मत्तु, जहामि=सांसारिकबन्धगळन्नु त्याग माडुत्तेनु, नानु जालाजालनु, असमसमनु, क्षरनु, अक्षरनु, मत्तु, अग्निः=जठराग्नि, सोमः=वीर्यविकारवु, वरुणः=मत्तु जलमय-विकारवु, ते=अवेल्लवु, च्यवन्ते=नन्निंद बिट्टुहोगुत्तवे, आवाग, राष्ट्रम्=रमादेव्याः (षष्ठ्यर्थे प्रथमा), अनुग्रह इत्यध्याहार्यः, ('श्रीर्वै राष्ट्रम्' इति शतपथम्) (६-७-३-७)। रमादेविय अनुग्रहवु (षष्ठ्यर्थेप्रथमा) परि आवत्=ननगे सिगुत्तदे, आवाग नानु, आयन् तत् अवामि=साधने माडुत्ता आ श्रीहयग्रीव देवरन्नु होंदुत्तेने। तत्=तम्, द्वितीयार्थेसुः, नानु अपहतपाप्मनु, आदकारण नन्न वृन्दावनवू पापप्रमोषणचुञ्चुवु। अयमेव 'बह्वीः समा इति श्रुत्या' इत्यस्य वृन्दावनाख्यानवचनस्य (१९-४७) श्रुतेश्च प्रामाणिकः स्वारसिकश्चार्थः। निरवकाश-श्रुतिरियम्। अनेन 'ऋजुत्वं वादिराजस्य श्रुतिमूलं न संशयः' इति सिद्धम्। किञ्च श्रीस्वाप्नवृन्दावनाख्यानस्य प्रामाण्यम्—'तस्माद्यो राजा विजिती स्याद् अप्ययजमान आख्यापयेतैवैतच्छौनःशेपमाख्यानं नहास्मिन्नल्पं च नैनः परिशिष्यते' इत्यैतरेव-ब्राह्मणवचनेन (७-३-१८) सिद्धम्। अस्य ब्राह्मणवाक्यखण्डस्यार्थस्तु—'तस्मात्

कारणात्, यो राजा विजिती स्यात्=यः श्रीलातव्यो वादिराजो दुर्वादिषु निरन्तरं विजिती स्यात् जयशीलोऽस्ति स तादृशः, अप्ययजमानः=(अप्यश्चासौ यजमानश्चेति अप्ययजमान इति कर्मधारयः समासः) अप्यः=अन्वहम् अण्डोदके श्रीहयग्रीव-प्रेरणया हंसो हंसरहस्यकृत् श्वासनियामकत्वेन सन् संस्कृतः स्थितश्च, (अहं शुभोदसागरेऽन्वहं विभोर्हि वासरे। सुहंसरूपिणो हरेर्गृहं सरामिरेऽरमम्। कारितुं सर्वभृत्यैश्च तारितुं भवसागरात्। स्मारितुं सर्वश्रेयांसि प्रेरितुं सर्वशः सुरान्। अहं ममेत्यहङ्काररहितो वै हरेरिह। करोम्यहरहः कर्म हंसो हंसरहस्यकृत्।' इति श्रीस्वाप्नवृन्दावनाख्यानम् (९-५२, ५३, ५४)। अप्यः=अण्डोदके स्थितोऽग्रेगो वादिराजः। तथाहि समाख्याश्रुतिः 'अग्रेगो राजाप्यः' इति (ऋक् ९-८६-४५)। पुनः स एव वादिराजः, यजमानः=निरन्तरं श्रीहयग्रीवस्वामिपूजनं कुर्वाणः (यज-देवपूजासङ्गतिकरणदानकरणमित्रकरणपथिष्विति धातोः पूङ्यजोः शानन्निति सूत्रेणसिद्धम्) (यद्) आख्यापयेत=(आङ्पूर्वात् ख्या प्रकथन इत्यस्माद्धातोर्विधि-लिङि भविष्यति णिचि आत्मनेपदे रूपम्) दुरितकुलमहातूलदाहकं, संसारोदन्व-दुत्तारयानपात्रम्, स्वस्य वृन्दावनाख्यानं ब्राह्मणस्वप्नमुखेन आख्यापयेत। (एष्यन्तु निश्चितम् इति न्यायेन नित्येतिहासत्वात्वाद्वेदस्य च प्रामाण्यं सिद्धम् स्वाप्नवृन्दावना-ख्यानस्य) (तद्) एव=इव, एवशब्दोऽत्र सादृश्यार्थः, तादृशस्वाप्नवृन्दाख्यानमिव पठनश्रवणमात्रेण पापारण्यदावानलम्, एतत् शौनःशेपमाख्यानम्=एतत् शुनः-शेपसम्बन्धि आख्यानम्, अस्यापि श्रवणेन पठनेन आख्यापनेन च, न हास्मि-न्नल्पश्च=नहास्मिन्नल्पश्चेत्यत्र परिशिष्यत इति शब्दो योजनीयः। 'नह प्रत्यारम्भे' इति पाणिनिः। प्रत्यारम्भो निश्चितनिषेध इति भीमसेनः। 'अल्पम्=मर्त्यम्=मरणार्हम्' इति वाचस्पतिः। 'अथ यदल्पं तन्मर्त्यम्' इति च्छान्दोग्यश्रुतिः। नैव मर्त्यपापम्=मर्त्यकृतं पापम् लोकेऽस्मिन् परिशिष्यत इत्यर्थः। पुनः, नैनः परिशिष्यते=न किञ्चिदपि दुरितं लोकेऽस्मिन् परिशिष्यते=उर्वरितं भवति। श्रीवादिराजर कृतियाद स्वाप्नवृन्दाख्यानद पठनमननश्रवणगळिंद मत्तु प्रकथनदिंद पापसमूहवु ह्यागे उर्वरितवागुवदिल्लो हागेये शुनःशेपाख्यानद श्रवणदिंदलू प्रकथन-दिंदलू लोकदल्लि पापराशि परिशेषवागुवुदिल्ल एंदु ई ऐतरेयब्राह्मणवचनद प्राकरणिक

रहस्यवु ॥ निरवकाशश्रुतिरियम् । इल्लि 'अध्यः, यजमानः' ई एरडु शब्दगळु श्रीवादिराजरन्ने निर्देश माडुत्तवे । याकेंदरे वृन्दावनाख्यानवन्नु माडिद्दु लातव्यराद श्रीराजरोब्बरे । बेरे यारु अल्ला । अतः श्रीराजर ऋजुत्व सिद्धकोटिकवे । साध्य-कोटिकवु अल्लवे अल्ल । इदरिन्द स्वाप्नवृन्दावनाख्यानद अंहोनाशकत्वशक्ति मत्तु परमप्रामाण्य ई श्रुतिवचनदिंदले निर्धारितवायितु ॥ श्रीराजर आख्यान परममङ्गळ परमप्रमाण एंदु निर्धारितवायितु ।

**१५२ श्लोके**—दासपरम्पराम्=दासीदासपरम्परामित्यर्थः ।

**१६० श्लोके**—मोक्षेन्दुदुग्धोदधिः=मोक्षवेंबो चन्द्रनन्नु हुट्टिसुवदुग्धोदधियंते दुग्धोदधि एंदु विग्रहवाक्य । सम्पन्मृगीवागुरा=ज्ञानभक्तिवैराग्यश्वर्यसम्पत्तिगळेंबो मृगीगळन्नु एंदरे हरिणगळन्नु हिडुकोंबुव दोड्ड जालरियंते । इत्यशेषमतिमङ्गळम् ।

**परमपूज्यश्रीमत्सत्यप्रमोदतीर्थगुर्वन्तर्गतभारतीरमणमुख्यप्राणान्तर्गत-श्रीमूलरामचन्द्रार्पणमस्तु ॥**

पूर्णचित्सुखदेहाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्तमुक्तिप्रदायिने ॥
सत्यलोकेश्वरः प्राणो मध्वाचार्यो जगद्गुरुः ।
यस्तस्य हृदयाम्भोजवासी व्यासः प्रसीदतु ॥

## ನಮ್ಮಲ್ಲಿ ದೊರಕುವ ಅನ್ಯ ಪುಸ್ತಕಗಳು

1 ಸತ್ಯಧರ್ಮಕೃತಂ ಶ್ರೀ ವಾದಿರಾಜ ಸ್ತೋತ್ರಮ್ ರೂ. 10–00
(ಪಂ. ಆನಂದತೀರ್ಥಾಚಾರ್ಯರ ಗುರುಭಾವ ಪ್ರಕಾಶಿಕೆಯೊಂದಿಗೆ)

2 ಶ್ರೀ ವಾದಿರಾಜಗುರುವಂದನಮ್ 1–00
(ಪಂ. ಆನಂದತೀರ್ಥಾಚಾರ್ಯರು)

3 ಶ್ರೀವಾದಿರಾಜಗುರುವಂದನಮ್ 2–00
(ಶ್ರೀ H. ಸುಬ್ಬರಾವ್, M.A. ಇವರ ಆಂಗ್ಲ ವಿವರಣೆಯೊಂದಿಗೆ)

4 ಶ್ರೀವಾದಿರಾಜರು–ಪಂಚರತ್ನಗಳು 5–00
(ಶ್ರೀ ಜಿ. ಜಿ. ಪುರಾಣಿಕ)

5 ಭಾವಿಸಮೀರ ಶ್ರೀವಾದಿರಾಜರ–ಕೃತಿ–ಸ್ವರೂಪ 10–00
ಸನ್ನಿಧಾನಗಳ ವಿಚಾರ (ಶ್ರೀ ಜಿ. ಜಿ. ಪುರಾಣಿಕ)

6 ಭಾವಿಸಮೀರ ಶ್ರೀವಾದಿರಾಜಗುರುಸಾರ್ವಭೌಮರು 18–00
(ಶ್ರೀ ಜಿ. ಜಿ. ಪುರಾಣಿಕ)

7 ಗುರುಸಾರ್ವಭೌಮ–ಶ್ರೀವಾದಿರಾಜರು 3–00
ಸಂಕ್ಷಿಪ್ತ ಚರಿತ್ರೆ (ಕಟ್ಟೀ ವೆಂಕಣ್ಣಾಚಾರ್ಯರು)

### ಪ್ರತಿಗಳಿಗೆ ಸಂಪರ್ಕಿಸಿರಿ

1. ಶ್ರೀ ವ್ಹಿ. ಬಿ. ವಾಳ್ವೇಕರ
"ಚತುರ್ಥೋ ವಾದಿರಾಜಕಃ" ನಿಲಯ,
1135, ಅನಂತಶಯನ ಗಲ್ಲಿ,
ಬೆಳಗಾಂವಿ–590 002

2 ಶ್ರೀ ಎನ್. ವ್ಹಿ. ಕುಲಕರ್ಣಿ
ಮ್ಯಾನೇಜರ್, ಅರಣ್ಯಭವನ,
ಮಲ್ಲೇಶ್ವರಂ, 18ನೇ ಕ್ರಾಸ್,
ಬೆಂಗಳೂರು–560 003

### ಮುಂದಿನ ಪ್ರಕಟನೆಗಳು

1 ಶ್ರೀವಾದಿರಾಜಗುರುವರ ಚರಿತಾಮೃತಮ್ (ಮೂಲ)
(ಶ್ರೀ ರಾಮಚಂದ್ರಾಚಾರ್ಯ ವಿರಚಿತ)

2 ಶ್ರೀವಾದಿರಾಜಗುರುವರ ಚರಿತಾಮೃತ
(ಕನ್ನಡ ಕಾವ್ಯರೂಪ)

3 ಭಾವಿಸಮೀರ ಶ್ರೀವಾದಿರಾಜರ ಭಕ್ತಾಗ್ರಣಿ
(ಶ್ರೀ ವಾಳ್ವೇಕರ ವೆಂಕಣ್ಣಾಚಾರ್ಯರು)

**ಶ್ರೀ ಹಂಸವಾಹನ ಪ್ರಕಾಶನ**
**1073, ಅನಂತಶಯನ ಬೀದಿ, ಬೆಳಗಾಂವಿ–590 002**